# शान्तिजप मन्त्र पाठः

**Version 2.1** **November 15, 2015**

## Contents

1 गणपत्यथर्व-शीर्षोपनिषत् ..... 9
2 वेदादया ..... 16
2.1 रक्षोघ्नं ..... 16
2.2 आप्यम् ..... 19
3 पवमान सूक्तं ..... 20
4 वास्तु मन्त्रः ..... 25
5 वरुण सूक्तं ..... 26
6 ब्रह्म सूक्तं ..... 28
7 विष्णु सूक्तं ..... 29
8 रुद्र सूक्तं ..... 31
9 दुर्गा सूक्तं ..... 32
10 श्री सूक्तं ..... 34
11 मेधा सूक्तं ..... 37

12 भू सूक्तं ........ 39

13 भाग्य सूक्तं ........ 41

14 मृत्यु सूक्तं ........ 42

15 मृत संजीविनी सूक्तं (यक्ष्मघ्न सूक्तं) ........ 49

16 आयुष्य सूक्तं ........ 50

17 नवग्रह सूक्तं ........ 52

18 दिक् पालका मन्त्राः ........ 58

19 नक्षत्र (सूक्तं) ........ 61

20 शान्ति पञ्चकं ........ 77

21 रुद्र नमकं ........ 80

22 चमकं ........ 96

23 पुरुष सूक्तं ........ 106

24 उत्तर नारायणं ........ 109

25 महा नारायणं ........ 110

26 घोष शान्ति ........ 113

27 हिरण्यगर्भ सूक्तं ........ 119

28 वेद काण्ड तैत्तिरीय संहिता ........ 121

28.1 प्रथमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 121

28.2 द्वितीयकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 121

28.3 तृतीयकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 122

28.4 चतुर्थकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 122

28.5 पञ्चमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 123

28.6 षष्टमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 123

28.7 सप्तमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः ........ 124

28.8 सप्तमकाण्डे पञ्चमप्रश्नः अन्त्यपञ्चातिः ........ 124

28.9 तैत्तिरीय यजुब्राह्मणम् –प्रथमाष्टके प्रथमप्रश्नः प्रथमपञ्चातिः ........................................................ 125

28.10 द्वितीयाष्टके प्रथमप्रश्नः प्रथमपञ्चातिः ................................ 125

28.11 तृतीयाष्टके प्रथमप्रश्नः प्रथमपञ्चातिः ................................ 126

28.12 तृतीयाष्टके नवमप्रश्नः प्रथमपञ्चातिः ................................ 126

28.13 तृतीयाष्टके नवमप्रश्नः अन्त्यपञ्चातिः ................................ 127

28.14 काटके प्रथमप्रश्नः प्रथमपञ्चातिः ...................................... 127

28.15 काटके तृतीयप्रश्नः अन्त्यपञ्चातिः ...................................... 128

28.16 आरण्यके प्रथमप्रश्नः प्रथमपञ्चातिः .................................. 129

28.17 आरण्यके दशमप्रश्नः अन्त्यपञ्चातिः .................................. 129

29 ऋचां प्राची ........................................................................................ 131

30 प्रदक्षिण मन्त्राः ........ 135

31 प्रोक्षण मन्त्राः ........ 137

32 ओषधि सूक्तं ........ 140

33 मन्त्र पुष्पं ........ 143

34 अघमर्षण सूक्तं ........ 147

35 त्रिसुपर्ण मन्त्राः ........ 150

36 जयादि होमः ........ 153

36.1 वसोर्धारा मन्त्र पाठः ........ 165

36.2 पूर्णाहुतिः ........ 168

37 घन मन्त्राः ........ 169

37.1 मे जीवातुः ........ 169

37.2 मयि मेधां मयि प्रजां ........ 172

37.3 मारुत मनर्वाणं ........ 173

**37.4** सा प्रजां.......................................................................... **174**

**37.5** यस्य पुत्रः.......................................................................... **175**

**37.6** ये देवा दिवि भागा.......................................................................... **176**

**37.7** प्रजामायुर्धनं च.......................................................................... **179**

**37.8** सर्वेभ्यो वै कामेभ्यः.......................................................................... **179**

**37.9** पुष्टिं धत्तः.......................................................................... **181**

**37.10** ता विष्णो पाहि.......................................................................... **182**

**37.11** आशिषमेवै तामा शास्ते.......................................................................... **184**

**37.12** एवास्मिन्नायु र्ददतिः.......................................................................... **185**

**37.13** शतमानं भवति.......................................................................... **186**

**37.14** वै प्रजा.......................................................................... **187**

38 आशीर्वाद मन्त्राः ........ 189

38.1 आरण्यके द्वितीयप्रश्नः प्रथमपञ्चातिः ........ 192

38.2 आरण्यके द्वितीयप्रश्नः द्वितीयपञ्चातिः ........ 193

38.3 नारायणॊपनिषत् ........ 194

39 प्रकीर्णाध्याय ........ 197

39.1 ब्राह्मण एक हॊता ........ 197

39.2 नमः प्राच्यै ........ 199

40 ऐकमत्य सूक्तं ........ 200

Notes: This Book has been brought to you with the courtesy of some Veda learners who have collaborated to prepare this book.

Please give your feedback, comments and report errors to the e-mail id vedavms@gmail.com. We shall strive to make this book more accurate and error-free.

You may note that there are inherent "paata bedhas" when we compare various sources and books. We have made constant reference to the Taittiriya Sakhaa compiled and commented by Shri. Sayanacharya of 13th Century and Shri Bhatta Bhaskaracharya (period unknown). Their manuscript compilations were later converted into books by great Scholars. One of such sets of "Taittiriya" was printed and published during earlier 1900 A.D. at Govt. Branch Press, Mysore and another set later published under "Anandaashram Series". These Books were referred to by us as our primary source material for this Book.

This book has not been prepared with any commercial purpose and is purely for studies.

**Conventions used in Letters:**

ँ – is represented by (g)

ꣳ – is represented by (gg)

ꣳ –is represented by (gm)

ँ –is represented as anunaasikam

# 1 गणपत्यथर्व–शीर्षोपनिषत्

ओं भद्रं दधातु ।

ओं । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभि–र्यजत्राः ।

स्थिरै–रङ्गै–स्तुष्टुवा॒ꣳ सस्तनूभिः । व्यशेम देवहितं यँदायुः ।

स्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्तिनः पूषा विश्ववेदाः ।

स्वस्ति–नस्ताक्ष्यो अरिष्टनेमिः । स्वस्तिनो बृहस्पति र्दधातु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

(ओं) अथ गणपत्यथर्वशीर्षं व्याँख्यास्स्यामः ।

ओं नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्त्वमसि ।

त्वमेव केवलं कर्त्ताऽसि । त्वमेव केवलं धर्त्ताऽसि ।

त्वमेव केवलं हर्त्ताऽसि । त्वमेव सर्वं खल्विदं ब्रह्मासि ।

त्वं साक्षा–दात्माऽसि नित्यं ॥ 1

ऋतँ वच्मि । सत्यँ वच्मि ॥ 2

अवत्वंमां । अववक्तारं । अव श्रोतारं । अवदातारं । अवधातारं ।
अवानूचा–नमवशिष्यं । अव पश्चात्तात् । अव पुरस्तात् । अवोत्तरात्तात् ।
अव दक्षिणात्तात् । अव चोर्ध्वात्तात् ।
अवाधरात्तात् ।  सर्वतोमां पाहि पाहि समन्तात् ॥ 3

त्वं वाङ्–मयस्त्वं चिन्मयः । त्वमानन्द–मयस्त्वं ब्रह्ममयः ।
त्वं सच्चिदानन्दा–ऽद्वितीयोऽसि । त्वंप्रत्यक्षं ब्रह्मासि ।
त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ 4

सर्वं जगदिदं त्वत्तो जायते । सर्वं जगदिदं त्वत्तस्तिष्ठति ।
सर्वं जगदिद त्वयि लयमेष्यति । सर्वं जगदिदं त्वयि प्रत्येति ।
त्वं भूमि–रापो–ऽनलो–ऽनिलो नभः । त्वं चत्वारि वाक्पदानि ॥ 5

त्वं गुणत्रयातीतः । त्वं अवस्थात्रयातीतः । त्वं देहत्रयातीतः ।
त्वं कालत्रयातीतः । त्वं मूलाधार–स्थितोऽसि नित्यं ।
त्वं शक्तित्रयात्मकः । त्वाँयोगिनो ध्यायन्ति नित्यं ।

त्वं ब्रह्मा त्वँविष्णुस्त्वं–रुद्रस्त्व–मिन्द्रस्त्व–मग्निस्त्वँ–वायुस्त्वं

सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्म भूर्भुवस्स्वरोँ ॥ **6**

गणादिंपूर्व–मुच्चार्य वर्णादिं तदनन्तरं । अनुस्वारः परतरः ।

अर्धेन्दु–लसितं । तारेण ऋद्धं । एतत्तव–मनुस्वरूपं । गकारः पूर्वरूपं ।

अकारो मद्ध्यम रूपं । अनुस्वार श्चान्त्य रूपं । बिन्दु रुत्तर रूपं ।

नादः सन्धानं । सꣳहिता सन्धिः । सैषा गणेश विद्या । गणक ऋषिः ।

निचृद्गायत्री च्छन्दः । (श्री महा) गणपति–र्देवता । ॥ **7**

**ओं गं गणपतये नमः ॥**

एक दन्ताय विद्महे वक्र तुण्डाय धीमहि ।

तन्नो दन्तिः प्रचोदयात्– (3 times) ॥ **8**

एक दन्तं चतुर्हस्तं पाश–मङ्कुश धारिणं ।

रदञ्च वरदं–हस्तै र्बिभ्राणं मूषकध्वजं ।

रक्तं लंबोदरं शूर्पकर्णकं रक्तवाससं ।

रक्तगन्धा–नुलिप्ताङ्गं रक्तपुष्पैः सुपूजितं ।
भक्तानुकंपिनं देवं जगत्कारण–मच्युतं ।
आविर्भूतंच सृष्ट्यादौ प्रकृतेः पुरुषात्परं ।
एवं ध्यायतियो नित्यं स योगी योगिनां वरः ॥ 9

नमो व्रातपतये , नमो गणपतये , नमः प्रमथपतये,
नमस्तेऽस्तु लंबोदराय , एकदन्ताय ,विघ्न(वि)नाशिने ,
शिवसुताय, श्रीवरदमूर्त्तये नमः ॥ 10

एतदथर्वशीर्षं योऽधीते । स ब्रह्मभूयाय कल्पते ।
स सर्व विघ्नै–र्नबाध्यते । स सर्वतः सुखमेधते ।
स पञ्च महा पापात् प्रमुच्यते ।
साय–मधीयानो दिवसकृतं पापं नाशयति ।
प्रातर–धीयानो रात्रिकृतं पापं नाशयति ।
सायं प्रातः प्रयुञ्जानो पापोऽपापो भवति ।

सर्वत्राधीयानो–ऽपविघ्नो भवति । धर्मार्त्थ–काम–मोक्षं च विन्दति ।
इद–मथर्वशीर्ष–मशिष्याय न देयं । यो यदि मोहाद् दास्यति ।
स पापीयान् भवति । सहस्रावर्तनाद्यं ँय काममधीते ।
तं तमनेन साधयेत् ॥ **11**

अनेन गणपति–मभिषिञ्चति । सवाग्मी भवति ।
चतुर्त्थ्या मनश्नन् जपति । स विद्यावान् भवति । इत्यथर्वण–वाक्यं ।
ब्रह्माद्यावरणं ँविद्यात् । न बिभेति कदाचनेति ॥ **12**

यो दूर्वाङ्कुरै–र्यजति । स वैश्रवणोपमो भवति । यो लाजै–र्यजति ।
स यशोवान् भवति । स मेधावान् भवति । यो मोदक–सहस्रेण यजति ।
स वाञ्छित–फलमवाप्नोति । यः साज्य समिद्भि–र्यजति ।
स सर्वं ँलभते स सर्वं ँलभते || **13**

अष्टौ ब्राह्मणान् सम्यग्ग्राहयित्वा । सूर्य वर्चस्वी भवति ।
सूय ग्रहे महानद्यां प्रतिमा सन्निधौ वा जप्त्वा । सिद्ध मन्त्रो भवति ।

महा विघ्नात् प्रमुच्यते । महा दोषात् प्रमुच्यते ।

महा प्रत्यवायात्  प्रमुच्यते । महा पापात् प्रमुच्यते ।

स सर्व विद्भवति स सर्व विद्भवति । य एवं वेद । इत्युपनिषत् ॥ **14**

सहनाववतु । सहनौभुनक्तु । सहवीर्यंकरवावहै ।

तेजस्विना वधीतमस्तुमा विद्विषावहै ॥

ओं शान्तिः शान्तिः शान्तिः॥

ओं भद्रं दधातु । ओं भद्रं कर्णेभिः शृणुयाम देवाः ।

भद्रं पश्येमाक्षभि र्यजत्राः । स्थिरै–रङ्गै–स्तुष्टुवाꣳ सस्तनूभिः ।

व्यशेम देवहितं यदायुः । स्वस्तिन इन्द्रो वृद्धश्रवाः ।

स्वस्तिनः पूषा विश्ववेदाः । स्वस्ति–नस्ताक्ष्र्यो अरिष्टनेमिः ।

स्वस्तिनो बृहस्पति र्दधातु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

# 2 वेदादया

ओं । अग्निमीळे पुरोहितं–यज्ञस्य देवमृत्विजं । होतारं रत्न धातमं ।

इषेत्वोर्जेत्वा वायवस्स्थो पायवस्स्थ देवो वस्सविता प्रार्पयतु

श्रेष्ठतमाय कर्मणे ।

अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सथ्सि बर्हिषि ।

शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शँयोरभि स्रवन्तुनः ॥ 1

## 2.1 रक्षोघ्नं

कृणुष्व पाजः प्रसितिन्न पृथ्वीं याहि राजे वामवा इभे न ।

त्रृष्वीमनु प्रसितिं–द्रूणानोऽस्ताऽसि विध्य रक्षस स्तपिष्ठैः ।

तवभ्रमास आशुया पतंत्यनु स्पृश–धृषता शोशुचानः ।

तपूंष्यग्ने जुह्वापतं–गानसन्दितो विसृज विष्व गुल्काः ।

प्रतिस्पशो विसृज–तूर्णि तमो भवा पायुर्विशो अस्या अदब्धः ॥ 2

यो नो दूरे अघशꣳ सोयो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ।
उदग्नेतिष्ठ प्रत्या तनुष्वन्य–मित्राꣳ ओषता–त्तिग्महेते ।
यो नो अरातिꣳ समिधान चक्रे नीचातंधक्ष्यत सन्न शुष्कं ।
ऊर्ध्वो भव प्रतिविध्या–ध्यस्मदा विष्कृणुष्व दैव्यान्यग्ने ।
अवस्थिरा तनुहि यातु जूनां जामिमजामिं प्रमृणीहि शत्रून् ॥ 3

स ते जानाति सुमतिं यँविष्ठय ईवते ब्रह्मणे गातुमैरत् ।
विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत् ।
सेदग्ने अस्तु सुभग स्सुदानु–र्यस्त्वा नित्येन हविषाय उक्थैः ।
पिप्रीषतिस्व आयुषि दुरोणे विश्वेदस्मै सुदिना–साऽसदिष्टिः ।
अर्चामि ते सुमतिं घोष्यर्वाख्–सन्ते वा वा ता जरता मियंगीः ॥ 4

स्वश्वास्त्वा सुरथा मर्जये–मास्मे क्षत्राणि धारयेर–नुद्यून् ।
इहत्वा भूर्याचरे दुपत्मन्–दोषावस्त र्दीदिवाꣳ समनुद्यून् ।
क्रीडन्तस्त्वा सुमन–सस्सपेमाभि द्युम्ना तस्थिवाꣳ सोजनानां ।

यस्त्वा–स्वश्वस्सु–हिरण्यो अग्न उपयाति वसुमता रथेन ।
तस्य त्राता–भवसि तस्य सखा यस्त आतिथ्य मानुषग् जुजोषत् ॥ 5

महोरुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमाद–न्वियाय ।
त्वन्नो अस्य वचस–श्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ।
अस्वप्न जस्तरणय स्सुशेवा अतन्द्रा सोऽवृका अश्रमिष्ठाः ।
तेपायवः सध्रियञ्चो निषद्याग्ने तवनः पान्त्वमूर ।
ये पायवो मामतेयंते अग्ने पश्यन्तो अन्धंदुरिताद रक्षन्न् ।
ररक्षतान्थ् सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ 6

त्वया वयꣳ सधन्य–स्त्वो–तास्तव प्रणीत्य श्याम वाजान् ।
उभा शꣳ सा सूदय सत्यताते–ऽनुष्ठुया कृणुह्य–ह्रयाण ।
अया ते अग्ने समिधा विधेम प्रतिस्तोमꣳ शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्यस्मान् द्रुहो निदो मित्रमहो अवद्यात् ।

रक्षोहणं वाँजिनमाजि घर्मि मित्रं प्रथिष्ठ–मुपयामि शर्म ।
शिशानो अग्निः क्रतुभि–स्समिद्ध–स्सनो दिवा सरिषः पातुनक्तं ॥ 7

विज्योतिषा बृहता भात्यग्निरावि–र्विश्वानि कृणुते महित्वा ।
प्रादेवी–र्माया स्सहते–दुरेवा श्शिशीते शृंगे रक्षसे विनिक्षे ।
उत स्वानासो दिविषन्त्वग्ने स्तिग्मायुधा रक्षसे हन्त वा उ ।

मदे चिदस्य प्ररुजन्ति भामा नवरन्ते परिबाधो अदेवीः ॥ 8

## 2.2 आप्यम्

अग्ने यशस्विन् यशसे ममर्पयेन्द्रावती–मपचिती मिहावह ।
अयं मूर्द्धा परमेष्ठी सुवर्चा–स्समानाना–मुत्तम श्लोको अस्तु ।
भद्रं पश्यन्त उपसेदुरग्रे तपोदीक्षा–मृषय–स्सुवर्विदः ।
ततः क्षत्रं बलमोजश्च जातं तदस्मै देवा अभिसन्न–मन्तु ।
धाता विधाता परमोत सन्दृक् प्रजापतिः परमेष्ठी विराजा ।

स्तोमा–श्चन्दा७्सि निविदोम आहुरेतस्मै राष्ट्रमभि–सन्नमाम ।
अभ्यावर्त्तद्ध्व–मुपमेत साकमय७् शास्ता–ऽधिपतिर्वो अस्तु ।
अस्य विज्ञान–मनुस७्–रभद्ध्वमिमं पश्चादनु जीवाथ सर्वे ॥

---

# 3 पवमान सूक्तं

ओं ॥ हिरण्यवर्णाः शुचयः पावका यासुजातः कश्यपो यास्विन्द्रः ।
अग्निँया गर्भंदधिरे विरूपास्ता न आपश्श७ स्योना भवन्तु ॥
यासा७् राजा वरुणो याति मध्ये सत्यानृते अवपश्यं जनानां ।
मधुश्चुत–श्शुचयोयाः पावकास्ता न आपश्श७ स्योना भवन्तु ॥
यासां देवादिवि कृण्वन्ति भक्षँया अन्तरिक्षे बहुधा भवन्ति ।
याः पृथिवीं पयसोन्दन्ति शुक्रास्ता न आपश्श७ स्योना भवन्तु ॥
शिवेन मा चक्षुषा पश्यताप श्शिवया तनुवो–पस्पृशत त्वचंमे ।
सर्वा७् अग्नी७् रफ्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त ॥

(Additional chanting for Shanti Japam)

यददस्सं प्रयतीरहा वनदता–हते ।

तस्मादा नद्यो नामस्थतावो नामानि सिन्धवः ।

यत् प्रेषिता वरुणेन ताश्शीभ७् समवल्गत ।

तदाप्नो–दिन्द्रोवो यती–स्तस्मा–दापो अनु स्थन ।

अपकाम७ स्यन्दमाना अवीवरत वो हिकं ।

इन्द्रो वश्शक्तिभि र्देवी–स्तस्मा–द्वार्णामवो हितं ।

एको देवो अप्यतिष्ठथ्–स्यन्दमाना यथा वशं ।

उदानिषु–र्महीरिति तस्मा–दुदक–मुच्यते ।

आपो भद्रा घृतमिदाप आसुरग्नी–षोमौ बिभ्रत्याप इत्ताः ।

तीव्रोरसो मधुपृचा–मरङ्गम आमा प्राणेन सहवर्च सागन्न् ।

आदित्पश्या–म्युतवा श्रृणो–म्यामा घोषो गच्छति वाङ्न आसां ।

मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपँ यदावः ।

आपो हिष्ठा मयो भुवः तान ऊर्जे दधातन । महे रणाय चक्षसे ।

योवः शिवतमो रसस्तस्य भाजय तेहनः । उशतीरिव मातरः ।
तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।
दिवि श्रय स्वान्तरिक्षे यतस्व पृथिव्या संभव ब्रह्मवर्च–समसि
ब्रह्मवर्चसाय त्वा ॥ (Additional chanting ends)

पवमान–स्सुवर्जनः । पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ।
पुनन्तु मा देवजनाः । पुनन्तु मन वोधिया । पुनन्तु विश्व आयवः ।
जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा । शुक्रेण देव दीद्यत् ।
अग्ने क्रत्वा–क्रतू७ रनु ॥ **1**

यत्ते पवित्र–मर्चिषि । अग्ने वितत–मन्तरा । ब्रह्म तेन पुनीमहे ।
उभाभ्यां देव सवितः । पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।
वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वी–स्तनुवो वीतपृष्ठाः ।
तया मदन्त–स्सधमाद्येषु । वय७ स्याम पतयोरयीणां ॥ **2**

वैश्वानरो रश्मि–भिर्मा पुनातु । वातः प्राणेने षिरो मयो भूः ।
द्यावा पृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीतां ।
बृहद्भि–स्सवि तस्तृभिः । वर्षिष्ठै–र्देवमन्मभिः । अग्ने दक्षैः पुनाहिमा ।
येन देवा अपुनत । ये नापो दिव्यंकशः । तेन दिव्येन ब्रह्मणा ॥ **3**

इदं ब्रह्म पुनीमहे । यः पावमानी–रद्ध्येति ।
ऋषिभि–स्संभृत७ं रसं । सर्व७ं स पूतमश्नाति ।
स्वदितं मात–रिश्वना । पावमानीर्यो अद्ध्येति ।
ऋषिभि–स्संभृत७ं रसं । तस्मै सरस्वती दुहे ।
क्षीर७ं सर्पि र्मधूदकं । पावमानी–स्स्वस्त्ययनीः ॥ **4**

सुदुघाहि पयस्वतीः । ऋषिभि–स्संभृतो रसः । ब्राह्मणेष्व–मृत७ं हितं ।
पावमानी र्दिशन्तु नः । इमं ँल्लोकमथो अमुं । कामान्थ्–समद्ध्र्यन्तु नः ।
देवीर्देवैः समा भृताः । पावमानी–स्स्वस्त्ययनीः । सुदुघाहि घृतश्चुतः ।
ऋषिभि–स्संभृतो रसः ॥ **5**

ब्राह्मणेष्व–मृतꣳ हितं । येन देवाः पवित्रेण । आत्मानं पुनते सदा ।
तेन सहस्र धारेण । पावमान्यः पुनन्तु मा । प्राजापत्यं पवित्रं ।
शतोद्यामꣳ हिरण्मयं । तेन ब्रह्म विदो वयं ।
पूतं ब्रह्म पुनीमहे । इन्द्र–स्सुनीती सह मा पुनातु ।
सोम–स्स्वस्त्या वरुण–स्समीच्या । यमो राजाप्रमृणाभिः पुनातुमा ।
जातवेदा मोर्जयन्त्या पुनातु । (ओं) भूर्भुवस्सुवः ॥ **6**

तच्छँयोरा वृणीमहे । गातुं यँज्ञाय । गातु यँज्ञपतये ।
दैवीस्स्वस्ति–रस्तुनः । स्वस्ति–र्मानुषेभ्यः । ऊद्ध्र्वं जिगातु भेषजं ।
शन्नो अस्तु द्विपदे । शंचतुष्पदे ॥

ओं शान्तिः शान्तिः शान्तिः ॥

# 4 वास्तु मन्त्रः

वास्तोष्पते प्रतिजानी ह्यस्मान् स्वावेशो अनमीवो भवानः ।

यत्त्वे महेप्रति तन्नो जुषस्व शन्न एधि द्विपदे शंचतुष्पदे ।

वास्तोष्पते शग्मया स॑सदा ते सक्षीम हिरण्वया गातुमत्या ।

आ वः क्षेम उतयोगे वरन्नो यूयं पात स्वस्तिभि–स्सदानः ।

वास्तोष्पते प्रतरणो न एधि गोभिरश्वे–भिरिन्दो ।

अजरा सस्तेसख्ये स्याम पितेव पुत्रान् प्रतिनो जुषस्व ।

अमीवहा वास्तोष्पते विश्वा रूपाण्या विशन्न् । सखा सुशेव एधिनः ।

शिव॑ शिवं । भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ॥

---

# 5 वरुण सूक्तं

उदुत्तमं ँवरुण पाशमस्म–दवाधमं ँविमध्यम७ श्रथाय ।

अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ 1

अस्तभ्नाद्ध्या–मृषभो अन्तरिक्ष–ममिमीत–वरिमाणं पृथिव्या

आऽसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि ॥ 2

यत्किञ्चेदँ वरुण दैव्ये जनेऽभिद्रोहं मनुष्या–श्चरामसि ।

अचित्ती–यत्तव–धर्मा युयोपिम–मानस्तस्मा देनसो देव रीरिषः ॥ 3

कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्य–मुतयन्न विद्म ।

सर्वाताविष्य शिथिरेव देवाथाते–स्याम वरुण प्रियासः ॥ 4

अवतेहेडो वरुण नमोभिरव यज्ञे–भिरीमहे हविर्भिः ।

क्षयन्न स्मभ्य मसुर–प्रचेतो राजन्नेना७सि शिश्रथः कृतानि ॥ 5

तत्वायामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेह बोद्ध्युरुश९ स मा न आयुः प्रमोषीः ॥ 6

<u>वरुण गायत्री</u>

जुंभकाय विद्महे पाशहस्ताय धीमहि । तन्नो वरुणः प्रचोदयात् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 6 ब्रह्म सूक्तं

ब्रह्मजज्ञानं प्रथमं पुरस्ता–द्विसीमत–स्सुरुचो वेन आवः ।
सबुद्ध्निया उपमा अस्य विष्ठाः सतश्च योनि–मसतश्च विवः । 1

पिता–विराजा मृषभो–रयीणा–मन्तरिक्षं विश्वरूप आवि वेश ।
तमर्कै–रभ्यर्चन्ति वथ्सं ब्रह्म सन्तं ब्रह्मणा वर्द्धयन्तः । 2

ब्रह्म देवान जनयद् ब्रह्म विश्वमिदं जगत् ।
ब्रह्मणः क्षत्रं निर्मितं ब्रह्म ब्राह्मण आत्मना । 3

अन्तरस्मि–न्निमे लोका अन्तर्विश्वमिदं जगत् ।
ब्रह्मैव भूतानां ज्येष्ठं तेन कोऽर्हति स्पर्द्धितुं । 4

ब्रह्मन् देवास्त्रय स्त्रिं॰ शद् ब्रह्म–न्निन्द्र प्रजापती ।
ब्रह्मन्ह विश्वा भूतानि नावीवान्त–स्समाहिता । 5

चतस्र आशाः प्रचरन्त्वग्नयः इमन्नो यज्ञन्नयतु प्रजानन् ।
घृतं पिन्वन्न–जर९् सुवीरं ब्रह्म समिद् भवत्या–हुतीनां । 6
(ओं शान्तिः शान्तिः शान्तिः ॥)

---

# 7 विष्णु सूक्तं

विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे राजा९्सि
यो अस्कभाय–दुत्तर९् सधस्थं विचक्रमाण–स्त्रेधोरु–गायः ॥ 1

**Optional**
विष्णो–रराटमसि विष्णोः पृष्ठमसि विष्णो–श्ञप्त्रेस्थो विष्णो–
स्स्यूरसि विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ 2

तदस्य प्रिय–मभिपाथो अश्यां । नरोयत्र देवयवो मदन्ति ।
उरुक्रमस्य सहि बन्धुरित्था । विष्णोः पदे परमे मद्ध्व उथ्सः ॥ 3

प्रतद्विष्णु–स्स्तवते वीर्याय । मृगोन भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥ 4

परो मात्रया तनुवा वृधान । नते महित्वमन्–वश्नुवन्ति ।
उभेते विद्म रजसी पृथिव्या विष्णो–देवत्वं । परमस्य वित्से ॥ 5

विचक्रमे पृथिवी मेष एतां । क्षेत्राय विष्णु–र्मनुषे दशस्यन्न् ।
ध्रुवासो अस्य कीरयो जनासः । उरुक्षितिं सुजनिमाचकार ॥ 6

त्रिर्देवः पृथिवी मेष एतां । विचक्रमे शतर्चसं महित्वा ।
प्रविष्णुरस्तु तवसस्तवीयान् । त्वेषं ह्यस्य स्थविरस्य नाम ॥ 7

(ओं शान्तिः शान्तिः शान्तिः ॥)

# 8 रुद्र सूक्तं

परिणो रुद्रस्य हेति र्वृणक्तु परित्वेषस्य दुर्मतिरघायोः ।
अवस्थिरा मघवद्भ्य–स्तनुष्व मीढ्व–स्तोकाय तनयाय मृडय ॥ 1

स्तुहि श्रुतं गर्त्तसदं युवानं मृगन्नभीम–मुपहत्नु–मुग्रं ।
मृडाजरित्रे रुद्रस्तवानो अन्यन्ते अस्म–न्निवपन्तु सेनाः ॥ 2

मीढुष्टम शिवतम शिवोनः सुमना भव ।
परमे वृक्ष आयुध न्निधाय कृत्तिँवसान आचर पिनाकं बिभ्रदागहि ॥ 3

अर्हन् बिभर्षि सायकानि धन्व । अर्हन्निष्कं यजतं विश्वरूपं ।
अर्हन्निदं दयसे विश्व मब्भुवं । नवा ओजीयो रुद्रत्वदस्ति ॥ 4

(अर्हन् बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपं ।
अर्हन्निदं दयसे विश्वमब्भुवं नवा ओजीयो रुद्रत्वदस्ति ॥ )

त्वमग्ने रुद्रो असुरो महो दिवस्त्व॒ꣳ शर्धो मारुतं पृक्ष ईशिषे ।
त्वं ँवातैररुणै–र्यासि शंगयस्त्वं पूषा विधतः पासि नुत्मना ॥ 5

आवो राजान–मद्ध्वरस्य रुद्र॒ꣳ होतार॒ꣳ सत्य यज॒ꣳ रोदस्योः ।
अग्निं पुरातन–यित्नो–रचित्ता–द्धिरण्य–रूपमवसे कृणुध्वं ॥ 6

(ओं शान्तिः शान्तिः शान्तिः ॥)

---

# 9 दुर्गा सूक्तं

जातवेदसे सुनवाम सोम–मरातीयतो निदहाति वेदः ।
सनः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ 1

तामग्निवर्णां तपसा ज्वलन्तीँ वैरोचनीं कर्मफलेषु जुष्टां ।
दुर्गां देवी॒ꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः ॥ 2

अग्ने त्वं पारया नव्यो अस्मान्थ् स्वस्तिभिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुलान उर्वी भवा तोकाय तनयाय शँयोः ॥ 3

विश्वानि नो दुर्गहा जातवेदः सिन्धुन्न नावा दुरितातिपर्षि ।
अग्ने अत्रिवन् मनसा गृणानोऽस्माकं बोध्यविता तनूनां ॥ 4

पृतनाजितꣳ सहमान–मुग्रमग्निꣳ हुवेम परमाथ् सधस्थात् ।
सनः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरितात्यग्निः ॥ 5

**(it is customary to chant only upto Para 5 for Shanti Japam )**

प्रत्नोषि–कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।
स्वाञ्चाग्ने तनुवं पिप्रय–स्वास्मभ्यञ्च सौभगमाय जस्व ॥ 6

गोभिर्जुष्ट–मयुजो निषिक्तं तवेन्द्र विष्णो–रनुसञ्चरेम ।
नाकस्य पृष्ठमभि सँवसानो वैष्णवीँ लोक इह मादयन्तां ॥ 7

कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् ॥
(ओं शान्तिः शान्तिः शान्तिः ॥)

# 10 श्री सूक्तं

(To be Chanted as per Rig Vedic Sruti ; hence “Anunaasikam”, “ँ” and “ꣳ” are not represented here as they are not used in Rig Vedic chants. In Some parts of India, when this Suktham is chanted in Krishna Yajur Veda “ँ” , “ꣳ” are added in para 9 and 12, whereas in other parts of India this full Suktham is chanted without “ँ” , “ꣳ”. )

हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजां ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ 1

तां म आवह जातवेदो लक्ष्मी–मनपगामिनीं ।
यस्यां हिरण्यं विन्देयं–गामश्वं पुरुषानहं ॥ 2

अश्वपूर्वां रथमद्ध्यां हस्तिनाद–प्रबोधिनीं ।
श्रियं देवीमुपह्वये श्रीर्मादेवीर्जुषतां ॥ 3

कां सोऽस्मितां हिरण्य–प्राकारा–मार्द्रां ज्वलंतीं तृप्तां तर्पयन्तीं ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियं ॥ 4

चन्द्रां प्रभासां यशसा–ज्वलंतीं श्रियंलोके देवजुष्टा–मुदारां ।
तां पद्मिनीमीं शरणमहं प्रपद्ये ऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ 5

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्यफलानि तपसा–नुदन्तु मायान्त–रायाश्च बाह्या अलक्ष्मीः ॥ 6

उपैतुमां देवसखः कीर्त्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्त्ति–मृद्धिं–ददातु मे ॥ 7

क्षुत्पिपासा–मलां ज्येष्ठाम–लक्ष्मीं–नाशयाम्यहं ।
अभूति–मसमृद्धिंच सर्वां निर्णुद मे गृहात् ॥ 8

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं ।
ईश्वरीं (or ईश्वरीꣳ) सर्व भूतानां तामिहोपह्वये श्रियं ॥ 9
मनसः काममाकूतिं–वाचः सत्य मशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ 10

कर्दमेन प्रजा भूता मयि संभव कर्दम ।
श्रियं वासयमे कुले मातरं पद्ममालिनीं ॥ 11

आपः सृजन्तु स्निग्धानि चिक्लीत वसमे गृहे ।
निचदेवीं मातरं (or मातर७) श्रियं वासयमे कुले ॥ 12

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीं ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ 13

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीं ।
सूर्यां हिरण्मयीं लक्ष्मीं–जातवेदो म आवह ॥ 14

तां म आवह जातवेदो लक्ष्मीमनप–गामिनीं ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान् विन्देयं पुरुषानहं ॥ 15

पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदलाय–ताक्षि ।
विश्वप्रिये विष्णु–मनोनुकूले त्वत्पाद–पद्मं मयि सन्निधत्स्व ॥

महादेव्यै च विद्महे विष्णु पत्न्यै च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥
श्री र्वर्चस्व–मायुष्य–मारोग्य–मावीधा–च्छोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवथ्सरं दीर्घमायुः ॥
(ओं शान्तिः शान्तिः शान्तिः ॥)

---

# 11 मेधा सूक्तं

मेधादेवी जुषमाणा न आगाद् विश्वाची भद्रा सुमनस्य माना ।
त्वया जुष्टा नुदमाना (जुषमाणा) दुरुक्तान् बृहद्वदेम विदथे सुवीराः ॥

त्वया जुष्ट ऋषिर्भवति देवित्वया ब्रह्माऽऽगतश्री रुतत्वया ।
त्वया जुष्टश्चित्रं विन्दते वसुसानो जुषस्व द्रविणो न मेधे ॥

मेधां म इन्द्रो ददातु मेधां देवी सरस्वती ।
मेधां मे अश्विना वुभा–वाधत्तां पुष्करस्रजा ॥

अफ्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।
दैवीं मेधा मनुष्यजा सा मां मेधा सुरभिर्जुषतां ॥
(दैवीं मेधा सरस्वती सा मां मेधा सुरभि जुषताॅं स्वाहा )

आमां मेधा सुरभि–र्विश्वरूपा हिरण्यवर्णा जगती जगम्या ।
ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्तां ॥

मयि मेधां मयि प्रजां मय्यग्नि–स्तेजो दधातु ,
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु ,
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

हंसगायत्री–

हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयात् ॥

(ओं शान्तिः शान्तिः शान्तिः ॥)

---

# 12 भू सूक्तं

ओं ॥ भूमि र्भूम्ना द्यौर्वरिणा–ऽन्तरिक्षं महित्वा ।
उपस्थे ते देव्यदिते–ऽग्निमन्नाद–मन्ना–द्यायादधे ।
आऽयङ्गौः पृश्निरक्रमी–दसनन् मातरं पुनः । पितरञ्च प्रयन्थ्सुवः ।
त्रि७्शद्धाम विराजति वाक्पतङ्गाय शिश्रिये । प्रत्यस्य वहद्युभिः ।
अस्य प्राणादपा–नत्यन्तश्चरति रोचना । व्यख्यन् महिषः स्सुवः ॥ 1

यत्वा क्रुद्धः परो वप–मन्युना यदवर्त्त्या ।
सुकल्पमग्ने तत्तव पुनस्त्वो–द्दीपयामसि ।
यत्ते मन्यु परोप्तस्य पृथिवी–मनुदद्ध्वसे ।
आदित्या विश्वे तद्देवा वसवश्च समाभरन्न् ।
मनो ज्योति र्जुषता–माज्यं विच्छिन्नं ँयज्ञ७् समिमन्दधातु ।
बृहस्पति–स्तनुता मिमन्नो विश्वे देवा इह मादयन्तां ॥ 2

सप्तते अग्ने समिधः सप्त जिह्वाः–सप्तर्षयः–सप्तधाम प्रियाणि ।
सप्त होत्रा स्सप्त धात्वा यजन्ति सप्तयोनी–रापृणस्वा घृतेन ।
पुनरूर्जा निवर्त्तस्व पुनरग्न इहायुषा । पुनर्न्नः पाहि विश्वतः ।
सहरँया निवर्त्तस्वाग्ने पिन्वस्व धारया । विश्वफ्–स्निया विश्वतस्परि ॥ 3

लोक–स्सलोक–स्सुलोक स्तेन आदित्या आज्यं जुषाणा वियन्तु ,
केत–स्सकेत–स्सुकेत स्तेन आदित्या आज्यं जुषाणा वियन्तु ,
विवस्वा॒ऽ अधिति देव जूतिस्तेन आदित्या आज्यं जुषाणा वियन्तु ॥ 4

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 13 भाग्य सूक्तं

ओं प्रातरग्निं प्रातरिन्द्र॑ हवामहे प्रातर्मित्रा वरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्र॑ हुवेम ॥ 1

प्रातर्जितं भगमुग्र॑ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आद्ध्रश्चिद्यं मन्यमान-स्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ 2

भगप्रणेत र्भग-सत्यराधो भगेमां धियमुद-वददन्नः ।
भगप्रणो जनय गोभि-रश्वै र्भगप्रनृभि र्नृवन्त-स्स्याम ॥ 3

उतेदानीं भगवन्त-स्स्यामोत प्रपित्व उत मद्ध्ये अह्नां ।
उतोदिता मघवन्थ्-सूर्यस्य वयं देवाना॑ सुमतौ स्याम ॥ 4

भग एव भगवा॑ अस्तु देवास्तेन वयं भगवन्त-स्स्याम ।
तं त्वा भग सर्व इज्जोहवीमि सनो भग पुर एता भवेह ॥ 5

समध्वरा–योषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगन्नो रथमिवाश्वा वाजिन आवहन्तु ॥ 6

अश्वावती गोमतीर्न उषासो वीरवती–स्सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्ति–भिस्सदानः ॥ 7

यो माऽग्ने भागिन ँ सन्तमथा भागं चिकीर्षति ।
अभाग–मग्ने तं कुरु मामग्ने भागिनं कुरु ॥ 8
भाग्य देवतायै नमः ॥ (ओं शान्तिः शान्तिः शान्तिः) ॥

---

## 14 मृत्यु सूक्तं

हरि ँ हरन्त मनुयन्ति देवाः । विश्वस्येशानं ँ वृषभं मतीनां ।
ब्रह्म सरूप मनु मेदमागात् । अयनं मा विवधि र्विक्रमस्व ।
माछिदो मृत्यो मावधीः । मामे बलं ँ विवृहो मा प्रमोषीः ।
प्रजां मा मे रीरिष आयुरुग्र । नृचक्षसं त्वा हविषा विधेम ।

सद्यश्च–कमानाय । प्रवेपानाय मृत्यवे । प्रास्मा आशा अशृण्वन् ।
कामेना जनयन् पुनः । कामेनमे काम आगात् ।
हृदया–द्धृदयं मृत्योः । यदमीषा मदः प्रियं । तदैतूपमा–मभि ॥ 1

परं मृत्यो अनुपरेहि पन्थां । यस्तेस्व इतरो देवयानात् ।
चक्षुष्मते श्रृण्वते ते ब्रवीमि । मानः प्रजाꣳ रीरिषो मोतवीरान् ।
प्रपूर्व्यं मनसा वन्दमानः । नाधमानो वृषभं–चर्षणीनां ।
यः प्रजाना मेकराण्मानुषीणां । मृत्युं ँयजे प्रथमजा मृतस्य ।
सर्वेषु वा एषु लोकेषु मृत्यवोऽन्वायत्ताः । तेभ्यो यदाहुतीर्न जुहुयात् ।
लोके लोक एनं मृत्यु र्विन्देत् ।
मृत्यवे स्वाहा मृत्यवे स्वाहेत्यभि पूर्व माहुती र्जुहोति ।
लोका ल्लोका देव मृत्युमव यजते । नैनं ँल्लोके लोके मृत्यु र्विन्दति ।
यदमुष्मै स्वाहाऽमुष्मै स्वाहेति जुह्वथ्सं चक्षीत ॥ 2

बहुं मृत्यु–ममित्रं कुर्वीत । मृत्यवे स्वाहेत्ये कस्मा एवैकाञ्जुहुयात् ।

एको वा अमुष्मिन् ल्लोके मृत्युः । अशनया मृत्युरेव ।

तमेवा मुष्मिन् ल्लोके ऽवयजते ।

भ्रूणहत्यायै स्वाहेत्य वभृथ आहुतिं जुहोति ।

भ्रूणहत्यामेवा वयजते । तदाहुः । यद्भ्रूण हत्या–ऽपात्र्याऽथ ।

कस्माद् यज्ञे ऽपिक्रियत इति । अमृत्युर्वा अन्यो भ्रूणहत्याया इत्याहुः ।

भ्रूणहत्या वाव मृत्युरिति ।

यद् भ्रूण हत्यायै स्वाहेत्य वभृथ आहुतिं जुहोति ।

मृत्युमेवा हुत्या–तर्पयित्वा परिपाणं कृत्वा । भ्रूणघ्ने भेषजं करोति ॥ 3

एता९ हवै मुण्डिभ औदन्यवः । भ्रूणहत्यायै प्रायश्चित्तिं ँविदाञ्चकार ।

योहास्यापि प्रजायां ब्राह्मण९ हन्ति । सर्वस्मै तस्मै भेषजं करोति ।

जुंबकाय स्वाहेत्य वभृथ उत्तमा– माहुतिं जुहोति ।

वरुणो वै जुंबकः । अन्तत एव वरुण–मवयजते ।

खलते–र्विक्लिधस्य शुक्लस्य पिङ्गाक्षस्य मूर्द्धं जुहोति ।
एतद्वै वरुणस्य रूपं । रूपेणैव वरुण मवयजते ॥ 4

## Part 2

अपैतु मृत्युर–मृतन्न आगन्वैव–स्वतो नो अभयङ्कृणोतु ।
पर्णं ँवनस्पते–रिवाभि नश्शीयता९् रयि–स्सचतान्न श्शचीपतिः ॥ 1

परं मृत्यो अनुपरेहि पन्थां ँयस्तेस्व इतरो देवयानात् ।
चक्षुष्मते श्रृण्वते ते ब्रवीमि मानः प्रजा९् रीरिषो मोत वीरान् ॥ 2

वातं प्राणं मनसा ऽन्वारभामहे प्रजापतिं ँयो भुवनस्य गोपाः ।
सनो मृत्यो स्त्रायतां पात्व९् हसो ज्योग्जीवा जरामशीमहि ॥ 3

अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेर मुञ्चः ।
प्रत्यौहता मश्विना मृत्यु–मस्माद्–देवानामग्ने भिषजा शचीभिः ॥ 4

शल्कैरग्नि मिन्धान उभौ लोकौ सनेमहं ।
उभयो र्लोकयो–ऋद्ध्वाऽति मृत्युं तराम्यहं ॥ 5

हरि७ हरन्त–मनुयन्ति देवा विश्वस्येशानं ँवृषभं मतीनां ।
ब्रह्मसरूप मनुमेदमागा–दयनं मा विवधी र्विक्रमस्व ॥ 6

माछिदो मृत्यो मावधी–र्मामे बलं ँविवृहो मा प्रमोषीः ।
प्रजां मामे रीरिष आयुरूग्र नृचक्षसं त्वा हविषा विधेम ॥ 7

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितं ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ 8

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
वीरान्मा नो रुद्र भामितोवधी र्हविष्मन्तो नमसा विधेम ते ॥ 9

प्रजापते न त्वदेता–न्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वय७ स्याम पतयो रयीणां ॥ 10

यत इन्द्र भयामहे ततो नो अभयं कृधि ।
मघवन्–च्छग्ध्वि तव तन्न ऊतये विद्विषो विमृधो जहि ॥ 11

स्वस्तिदा विशस्पति वृत्रहा विमृधो वशी ।
वृषेन्द्रः पुर एतुन स्वस्तिदा अभयं कर ः ॥ 12

त्र्यंबकं ँयजामहे सुगन्धिं पुष्टिवर्द्धनं ।
उर्वारुकमिव बन्धनान्–मृत्यो–र्मुक्षीय माऽमृतात् ॥ 13

अपमृत्यु–मपक्षुध–मपेत–श्शपथंजहि ।
अधानो अग्न आवह राय–स्पोष७् सहस्रिणं ॥ 14

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान् यज्ञस्य मायया सर्वानव यजामहे ॥ 15
(मृत्यवे स्वाहा मृत्यवे स्वाहा )

जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ 16

भूर्भूवस्वः । ओजो बलं । ब्रह्म क्षत्रं । यशो महत् ।
सत्यं तपो नाम । रूप–ममृतं । चक्षु श्रोत्रं । मन आयुः ॥
विश्वं ँयशो महः । समन्तपो हरो भाः ॥ 17

जातवेदा यदि वा पावकोऽसि । वैश्वानरो यदि वा वैद्युतोऽसि ।
शंप्रजाभ्यो यजमानाय लोकं ॥ ऊर्जं पुष्टिं दद–दभ्याव वृथ्स्व ॥ 18

............नक्षत्रे .......... राशौ जातस्य .............शर्मणः (मम / अस्य यजमानस्य) सकुटुंबस्य (स्त्री – जातायाः & नाम्नी)

मृत्यु–र्न्नश्यत्वायु वर्द्धतां भूः ।
मृत्यु–र्न्नश्यत्वायु वर्द्धतां भुवः ।
मृत्यु–र्न्नश्यत्वायु वर्द्धता৺ सुवः ।
मृत्यु–र्न्नश्यत्वायु वर्द्धतां भूर्भुवस्सुवः ।
मृत्यु–र्न्नश्यत्वायु वर्द्धतां ॥

––––––––––मृत्यु सूक्तं समाप्तं––––––––––––

# 15 मृत संजीविनी सूक्तं (यक्ष्मघ्न सूक्तं)

मुञ्चामित्वा हविषा जीवनाय कमज्ञात–यक्ष्मा–दुत राज–यक्ष्मात् ।
ग्राहि र्जग्राह यदि वैतदेनन्तस्या इन्द्राग्नी प्रमुमुक्तमेनं ॥ 1

यदिक्षितायु–र्यदिवापरेतो यदिमृत्योरन्ति कन्नीत एव ।
तमाहरामि निऋते रुपस्था–दस्पार्षमेनं शतशारदाय ॥ 2

सहस्राक्षेण शतशारदेन शतायुषा हविषा ऽहार्षमेनं ।
शतं यथेमं शरदो न यातीन्द्रो विश्वस्य दुरितस्य पारं ॥ 3

शतञ्जीव शरदो वर्द्धमान–श्शतं हेमन्ताञ्च्छत–मुवसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पति–श्शतायुषा हविषेमं पुनर्दुः ॥ 4

आहार्षं त्वा विदंत्वा पुनरागाः पुनर्न्नव ।
सर्वाङ्ग सर्वन्ते चक्षुः सर्व–मायुश्चते विदं ॥ 5

तदित् पदं न विचिकेत–विद्वान् । यन्मृतः पुनरप्येति जीवान् ।
त्रिवृद्यद् भुवनस्य रथवृत् । जीवो गर्भो न मृतस्स जीवात् ॥ 6

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 16 आयुष्य सूक्तं

यो ब्रह्मा ब्रह्मण उज्जहार प्राणैः शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्सन आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ 1

विभ्राजमान–स्सरिरस्य मद्ध्याद् रोचमानो घर्मरुचिर्य आगात् ।
स मृत्युपाशा–नपनुद्य घोरा–निहायुषेणो घृतमत्तु देवः ॥ 2

ब्रह्मज्योति र्ब्रह्मपत्नीषु गर्भं ँयमादधात् पुरुरूपं जयन्तं ।
सुवर्णरंभ–ग्रह–मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ 3

श्रियं ँलक्ष्मी–मौबला–मंबिकां गां षष्टीञ्च यामिन्द्र–सेनेत्युदाहुः ।
तां ँविद्यां ब्रह्मयोनिं सरूपा–मिहायुषे तर्पयामो घृतेन ॥ 4

दाक्षायण्य–स्सर्वयोन्य स्सुयोन्य–स्सहस्रशो विश्व रूपा विरूपाः ।
ससूनव–स्सपतयः सयूथ्या आयुषेणो घृतमिदं जुषन्तां ॥ 5

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् ।
तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजाᳬ रीरिषो मोत वीरान् ॥ 6

एकः पुरस्तात् य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनᳬ सांपराये स नो हवि घृत–मिहायुषेऽस्तु देवः ॥ 7

वसून् रुद्राना–दित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान्
गन्धर्वाᳫश्च पितृᳫश्च विश्वान् ।
भृगून्थ्–सर्पाᳫश्चां–गिरसोऽथ सर्वान् घृतᳬ हुत्वा
स्वायुष्या महयाम शश्वत् ॥ 8

विष्णो त्वन्नो अन्तम–श्शर्मयच्छ सहन्त्य ।
प्रते धारा मधुश्चुत उथ्संदुह्रते अक्षितं ॥ 9

(ओं शान्तिः शान्तिः शान्तिः ॥)

# 17 नवग्रह सूक्तं

**1.** (देवता – आदित्याः , अधिदेवता– अग्निः,

प्रत्यधिदेवता – पशुपतिः)

ओं आसत्येन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च ।

हिरण्ययेन सविता रथेना ऽऽदेवो याति भुवना विपश्यन् ॥

अग्निं दूतं वृँणीमहे होतारं विँश्ववेदसं । अस्य यज्ञस्य सुक्रतुं ॥

येषामीशे पशुपतिः पशूनां–चतुष्पदामुत च द्विपदां ।

निष्क्रीतोऽयं यँज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते आदित्याय नमः) 1

**2.** (देवता – अङ्गारकः , अधिदेवता – पृथिवी ,

प्रत्यधिदेवता – क्षेत्रपतिः)

ओं अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं ।

अपाꣳ रेताꣳसि जिन्वति ॥

स्योना पृथिवि भवाऽनृक्षरा निवेशनी । यच्छान–श्शर्म सप्रथाः॥

क्षेत्रस्य पतिना वयᳲ हितेनेव जयामसि ।

गामश्वं पोषयित्वा स नो मृडाती–दृशे ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते अङ्गारकाय नमः) 2

**3.** (देवता – शुक्रः, अधिदेवता – इन्द्राणी, प्रत्यधिदेवता – इन्द्रः)

ओं प्रवश्शुक्राय भानवे भरध्वᳲ हव्यं मतिं चाग्नये सुपूतं ।

यो दैव्यानि मानुषा जनूᳲ–ष्यन्त विश्वानि विद्मना जिगाति ॥

इन्द्राणी मासु नारिषु सुपत्नीमह–मश्रवं ।

न ह्यस्या अपरंचन जरसा मरते पतिः ॥

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते शुक्राय नमः) 3

**4.** (देवता – सोमः/चन्द्रमा, अधिदेवता– आपः ,

प्रत्यधिदेवता – गौरी)

ओं आप्यायस्व समेतु ते विश्वत–स्सोम वृष्णियं ।
भवा वाजस्य संगथे ॥

अफ्सुमे सोमो अब्रवीदन्त र्विश्वानि भेषजा ।
अग्निञ्च विश्व–शंभुवमा–पश्च विश्वभेषजीः ॥

गौरी मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन्न् ॥
(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते सोमाय नमः) 4

**5.** (देवता – बुधः, अधिदेवता – विष्णुः ,

प्रत्यधिदेवता – पुरुष नारायणः)

ओं उद्बुध्यस्वाग्ने प्रतिजागृह्येन मिष्टापूर्त्ते स७ृ सृजेथा मयञ्च ।
पुनः कृण्व७स्त्वा पितरं ँयुवान–मन्वाता७सी त्वयि तन्तुमेतं ॥

इदं विष्णु र्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पांसुरे ॥

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णो–श्नप्त्रेस्थो विष्णो स्स्यूरसि
विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते बुधाय नमः) **5**

**6.** (देवता – बृहस्पतिः, अधिदेवता – इन्द्र–मरुत,
प्रत्यधिदेवता – ब्रह्मण)

ओं बृहस्पते अति यदर्यो अर्हाद् द्युमद्–विभाति क्रतु मज्जनेषु ।
यद्दीद यच्छ वसर्त्त प्रजात तदस्मासु द्रविणं धेहि चित्रं ॥

इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सुतस्य ।
तव प्रणीती तव शूर शर्मन्ना–विवासन्ति कवयः सुयज्ञाः ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद् विसीमत–स्सुरुचो वेन आवः ।
सबुध्निया उपमा अस्य विष्ठास्सतश्च योनिम–सतश्च विवः ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते बृहस्पतये नमः) **6**

**7.** (देवता – शनैश्चरः, अधिदेवता – प्रजापतिः,

प्रत्यधिदेवता – यमः)

ओं शन्नो देवी–रभिष्टय आपो भवन्तु पीतये । शं ँयोरभि–स्रवन्तु नः ॥

प्रजापते न त्वदेता–न्यन्यो विश्वा जातानि परिता बभूव ।

यत्कामास्ते जुहुमस्तन्नो अस्तु वय७ स्याम पतयो रयीणां ॥

इमं ँयम प्रस्तरमाहि सीदाङ्गिरोभिः पितृभि–स्सविदानः ।

आत्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥

(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते शनैश्चराय नमः) 7

**8.** (देवता – राहु, अधिदेवता– सर्पः, प्रत्यधिदेवता – निर्ऋती)

ओं कया नश्चित्र आभुवदूती सदावृध स्सखा । कया शचिष्ठया वृता ॥

आऽयङ्गौः पृश्निरक्रमी–दसनन् मातरं पुनः । पितरञ्च प्रयन्थ्सुवः ॥

यत्ते देवी निर्ऋति राबबन्ध दाम ग्रीवास्व–विचर्त्यं ।
इदन्ते तद्विष्या–म्यायुषो न मध्या–दथा जीवः पितुमद्धि प्रमुक्तः ॥
(ओं अधिदेवता प्रत्यधिदेवता सहिताय भगवते राहवे नमः) 8

**9.** (देवता – केतुः , अधिदेवता – ब्रह्मा ,
प्रत्यधिदेवता – चित्रगुप्तः)

ओं केतुङ् कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥

ब्रह्मा देवानां पदवीः कवीना–मृषिर्विप्राणां महिषो मृगाणां ।
श्येनो गृध्राणा॰ स्वधिति र्वनाना॰ सोमः पवित्र मत्येति रेभन्न् ॥

सचित्र चित्रं चितयन्त–मस्मे चित्रक्षत्र चित्रतमं ँवयोधां ।
चन्द्रं रयिं पुरुवीरं बृहन्तं चन्द्र–चन्द्राभि–र्गृणते युवस्व ॥
(ओं अधिदेवता प्रत्यधिदेवता सहितेभ्यो भगवद्भ्यः केतुभ्यो नमः) 9

॥ ओं आदित्यादि नवग्रह देवताभ्यो नमो नमः॥

(ओं शान्तिः शान्तिः शान्तिः ॥)

# 18 दिक् पालका मन्त्राः

**1.** (देवता – इन्द्रः) (दिक् – पूर्व)

त्रातारमिन्द्र–मवितार–मिन्द्र७ं हवे हवे सुहव७ं शूरमिन्द्रं ।
हुवे नु शक्रं पुरुहूत–मिन्द्र७ं स्वस्ति नो मघवा धात्विन्द्रः ॥ 1

**2.** (देवता – अग्नीः) (दिक् – दक्षिण पूर्व/आग्नेय दिक्)

त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितम श्शोशुचानो विश्वा द्वेषा७ंसि प्रमुमुग्ध्यस्मत् ॥ 2

**3.** (देवता – यमः) (दिक् – दक्षिणं)

सुगन्नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा ।
यस्मिन्नेन–मभ्यषिञ्चन्त देवाः । तदस्य चित्र७ं हविषा यजाम ।
अप पाप्मानं भरणी र्भरन्तु ॥ 3

***4.*** (दॆवता– निऋतिः)                    (दिक् – दक्षिण पश्चिमं)

असुन्वन्त–मयजमान–मिच्छ स्तॆन–स्यॆत्यान् तस्करस्यान्वॆषि ।
अन्य–मस्म–दिच्छ सा त इत्या नमॊ दॆवि निऋतॆ तुभ्यमस्तु ॥ 4

***5.*** (दॆवता– वरुणः)                    (दिक् – पश्चिमं)

तत्वा यामि ब्रह्मणा वन्दमान–स्तदा शास्तॆ यजमानॊ हविर्भिः ।
अहॆडमानॊ वरुणॆह बॊध्युरुश२ स मा न आयुः प्रमॊषीः ॥ 5

***6.*** (दॆवता – वायुः)                    (दिक् – उत्तर पश्चिमं)

आ नॊ नियुद्भि–श्शतिनी–भिरध्वरं । सहस्रिणीभि–रुपयाहि यज्ञं ।
वायॊ अस्मिन् हविषि मादयस्व । यूयं पात स्वस्ति–भिस्सदानः ॥ 6

***7.*** (दॆवता – सॊमः)                    (दिक् – उत्तरं)

वय२ सॊम व्रतॆ तव । मनस्तनूषु बिभ्रतः । प्रजावन्तॊ अशीमहि ॥ 7

***8.*** (देवता – ईशानः) (दिक् – उत्तर पूर्व)

तमीशानं जगत–स्तस्थु–षस्पतिं । धियं जिन्वमवसे हूमहे वयं ।
पूषा नो यथा वेद सामसद्वृधे रक्षिता पायु–रदब्ध–स्स्वस्तये ॥ 8

***9.*** (देवता – ब्रह्मा) (दिक् – ऊद्र्ध्व **(Skywards)**)

अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।
यश्शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मा अवन्तु देवाः ॥ 9

***10.*** (देवता – विष्णुः) [दिक् – अधरं (पाताळं)]

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छान–श्शर्म सप्रथाः ॥ 10

---

# 19 नक्षत्र सूक्तं

**1. नक्षत्रं – कृत्तिका** **देवता – अग्निः**

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियं ।
इदमासां–ँविचक्षणं । हविरासं जुहोतन ।
यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा ।
स कृत्तिका भिरभि–सँवसानः । अग्निर्नो देवस्सुविते दधातु ॥ 1

**2. नक्षत्रं – रोहिणी** **देवता – प्रजापतिः**

प्रजापते रोहिणी वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ।
सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरदस्सवीराः ।
रोहिणी देव्युदगात् पुरस्तात् । विश्वा रूपाणि प्रतिमोदमाना ।
प्रजापतिꣳ हविषा वर्धयन्ती । प्रिया देवाना–मुपयातु यज्ञं ॥ 2

**3. नक्षत्रं – मृगशीर्षः** **देवता – सोमः**

सोमो राजा मृगशीर्षेण आगन्न् । शिवं नक्षत्रं प्रियमस्य धाम ।
आप्यायमानो बहुधा जनेषु । रेतः प्रजां यँजमाने दधातु ।
यत्ते नक्षत्रं मृगशीर्षमस्ति । प्रिय७ँ राजन् प्रियतमं प्रियाणां ।
तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शंचतुष्पदे ॥ 3

**4. नक्षत्रं – आर्द्रा** **देवता – रुद्रः**

आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नियानां ।
नक्षत्रमस्य हविषा विधेम । मा नः प्रजा७ँ रीरिषन् मोत वीरान् ।
हेती रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषता७ँ हविर्नः ।
प्रमुञ्चमानौ दुरितानि विश्वा । अपाघश७ँ सन्नु–दतामरातिं ॥ 4

**5. नक्षत्रं – पुनर्वसु** **देवता – अदितिः**

पुनर्नो देव्यदिति–स्पृणोतु । पुनर्वसू नः पुनरेतां यँज्ञं ।
पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः ।

एवा न देव्य–दितिर–नर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।
पुनर्वसू हविषा वर्धयन्ती । प्रियं देवाना–मप्येतु पाथः ॥ 5

**6. नक्षत्रं – पुष्यः** देवता – बृहस्पतिः

बृहस्पतिः प्रथमञ्जायमानः । तिष्यं नक्षत्रमभि संबभूव ।
श्रेष्ठो देवानां पृतनासु जिष्णुः । दिशो नु सर्वा अभयन्नो अस्तु ।
तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पति र्नः परिपातु पश्चात् ।
बाधे तान् द्वेषो अभयं कृणुतां । सुवीर्यस्य पतयस्याम ॥ 6

**7. नक्षत्रं –आश्रेषं** देवता – सर्पाः

इद९ सर्पेभ्यो हविरस्तु जुष्टं । आश्रेषा येषा मनुयन्ति चेतः ।
ये अन्तरिक्षं पृथिवीं–क्षियन्ति । तेन स्सर्पासो हवमागमिष्ठाः ।
ये रोचने सूर्यस्यापि सर्पाः । ये दिवं देवीमनु–सञ्चरन्ति ।
येषामाश्रेषा अनुयन्ति कामं । तेभ्य–स्सर्पेभ्यो मधु–मज्जुहोमि ॥ 7

**8. नक्षत्रं – मघा** **देवता – पितरः**

उपहूताः पितरो ये मघासु । मनोजवस–स्सुकृत–स्सुकृत्याः ।
ते नो नक्षत्रे हवमागमिष्ठाः । स्वधाभि र्यज्ञं प्रयतं जुषन्तां ।
ये अग्निदग्धा येऽनग्नि–दग्धाः । येऽमुल्लोकं पितरः क्षियन्ति ।
याꣳश्च विद्मयाꣳ उ च न प्रविद्म । मघासु यज्ञꣳ सुकृतं जुषन्तां ॥ 8

**9. नक्षत्रं – पूर्वफल्गुनी** **देवता – अर्यमा**

गवां पतिः फल्गुनी–नामसि त्वं । तद र्यमन् वरुण मित्र चारु ।
तंत्वा वयꣳ सनितारꣳ सनीनां । जीवा जीवन्तमुप सँविशेम ।
येनेमा विश्वा भुवनानि सञ्जिता । यस्य देवा अनुसँय्यन्ति चेतः ।
अर्यमा राजाऽजरस्तु विष्मान् । फल्गुनीना–मृषभो रोरवीति ॥ 9

**10. नक्षत्रं – उत्तर फल्गुनी** **देवता – भगः**

श्रेष्ठो देवानां भगवो भगासि । तत्त्वा विदुः फल्गुनी–स्तस्य वित्तात् ।
अस्मभ्यं–क्षत्रमजरꣳ सुवीर्यं । गोमदश्व–वदुपसन्नु–देह ।

भगोह दाता भग इत्प्रदाता । भगो देवीः फल्गुनी–राविवेश ।
भगस्येत्तं प्रसवं गमेम । यत्र देवै–स्सधमादं मदेम । ॥ **10**

**11. नक्षत्रं – हस्तः** **देवता – सविता**

आयातु देव–स्सवितो पयातु । हिरण्ययेन सुवृता रथेन ।
वहन् , हस्त॰ सुभगं विद्मनापसं । प्रयच्छन्तं पपुरिं पुण्यमच्छ ।
हस्तः प्रयच्छ त्वमृतं वसीयः । दक्षिणेन प्रतिगृभ्णीम एनत् ।
दातार–मद्य सविता विदेय । यो नो हस्ताय प्रसुवाति यज्ञं ॥ **11**

**12. नक्षत्रं – चित्रा** **देवता – त्वष्टा**

त्वष्टा नक्षत्र–मभ्येति चित्रां । सुभ॰ ससं–ँयुवति॰ रोचमानां ।
निवेशयन्न–मृतान् मर्त्या॰श्च । रूपाणि पि॰शन् भुवनानि विश्वा ।
तन्नस्त्वष्टा तदु चित्रा विचष्टां । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नः प्रजां ँवीरवती॰ सनोतु । गोभिर्नो अश्वै–स्समनक्तु यज्ञं ॥ **12**

**13. नक्षत्रं – स्वाती** — **देवता – वायुः**

वायु र्नक्षत्र–मभ्येति निष्ट्यां । तिग्मश्रृंगो वृषभो रोरुवाणः ।
समीरयन् भुवना मातरिश्वा । अप द्वेषा॑ᳪसि नुद–तामरातीः ।
तन्नो वायस्तदु निष्ट्या श्रृणोतु । तन्नक्षत्रं भूरिदा अस्तु मह्यं ।
तन्नो देवासो अनु जानन्तु कामं । यथा तरेम दुरितानि विश्वा ॥ 13

**14. नक्षत्रं – विशाखा** — **देवता – इन्द्राग्नी**

दूरम–स्मच्छत्रवो यन्तु भीताः । तदिन्द्राग्नी कृणुतां तद् विशाखे ।
तन्नो देवा अनुमदन्तु यज्ञं । पश्चात् पुरस्ता–दभयन्नो अस्तु ।
नक्षत्राणा–मधिपत्नी विशाखे । श्रेष्ठा–विन्द्राग्नी भुवनस्य गोपौ ।
विषूच–श्शत्रूनप–बाधमानौ । अपक्षुध–न्नुदतामरातिं । ॥ 14

**15. पौर्णमासि**

पूर्णा पश्चादुत पूर्णा पुरस्तात् । उन्मध्यतः पौर्णमासी जिगाय ।
तस्यां देवा अधि सं॒ वसन्तः । उत्तमे नाक इह मादयन्तां ।

पृथ्वी सुवर्चा युवति–स्सजोषाः । पौर्णमास्युदगा–च्छोभमाना ।
आप्याय–यन्ती दुरितानि विश्वा । उरुं दुहां यँजमानाय यज्ञं ॥ **15**

**16. नक्षत्रं – अनूराधा** **देवता – मित्रः**

ऋद्ध्यास्म हव्यै र्नमसोप–सद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनूराधान् हविषा वर्द्धयन्तः । शतं जीवेम शरदस्सवीराः ।
चित्रं–नक्षत्र–मुदगात् पुरस्तात् । अनूराधा स इति यद् वदन्ति ।
तन्मित्र एति पथिभि र्देवयानैः । हिरण्ययै र्विततै–रन्तरिक्षे ॥ **16**

**17. नक्षत्रं – ज्येष्ठा** **देवता – इन्द्रः**

इन्द्रो ज्येष्ठा मनु नक्षत्रमेति । यस्मिन् वृत्रं वृत्र तूर्ये ततार ।
तस्मिन् वय–ममृतं दुहानाः । क्षुधन्तरेम दुरितिं दुरिष्टिं ।
पुरन्दराय वृषभाय धृष्णवे । अषाढाय सहमानाय मीढुषे ।
इन्द्राय ज्येष्ठा मधुमद्दुहाना । उरुं कृणोतु यजमानाय लोकं ॥ **17**

**18. नक्षत्रं – मूलं** देवता – प्रजापतिः

मूलं प्रजां वीरवतीं ँ विदेय । पराच्येतु निर्ऋतिः पराचा ।
गोभि र्नक्षत्रं पशुभि–स्समक्तं । अह र्भूयाद् यजमानाय मह्यं ।
अहर्नो अद्य सुविते दधातु । मूलं नक्षत्रमिति यद् वदन्ति ।
पराचीं ँ वाचा निर्ऋतिं नुदामि । शिवं प्रजायै शिवमस्तु मह्यं ॥ 18

**19. नक्षत्रं – पूर्वाषाढा** देवता – आपः

या दिव्या आपः पयसा संबभूवुः । या अन्तरिक्ष उत पार्थिवीर्याः ।
यासामषाढा अनुयन्ति कामं । ता न आपः श७ स्योना भवन्तु ।
याश्च कूप्या याश्च नाद्या–स्समुद्रियाः । याश्च वैशन्तीरुत प्रासचीर्याः ।
यासामषाढा मधु भक्षयन्ति । ता न आपः श७ स्योना भवन्तु ॥ 19

**20. नक्षत्रं – उत्तराषाढा** देवता – विश्वेदेवाः

तन्नो विश्वे उप श्रृण्वन्तु देवाः । तदषाढा अभिसंयन्तु यज्ञं ।
तन्नक्षत्रं प्रथतां पशुभ्यः । कृषि र्वृष्टि र्यजमानाय कल्पतां ।

शुभ्राः कन्या युवतय–स्सुपेशसः । कर्मकृत–स्सुकृतो वीर्यावतीः ।
विश्वान् देवान् हविषा वर्द्धयन्तीः । अषाढाः काम मुपयान्तु यज्ञं ॥ **20**

**21. नक्षत्रं – अभिजिद्** **देवता – ब्रह्मा**

यस्मिन् ब्रह्माभ्यजयथ् सर्वमेतत् । अमुञ्च लोक मिदमूच सर्वं ।
तन्नो नक्षत्र–मभिजिद् विजित्य । श्रियं दधात्व–हृणीयमानं ।
उभौ लोकौ ब्रह्मणा सञ्जितेमौ । तन्नो नक्षत्र–मभिजिद् विचष्टां ।
तस्मिन् वयं पृतना स्संजयेम । तन्नो देवासो अनुजानन्तु कामं ॥ **21**

**22. नक्षत्रं – श्रवणं** **देवता – विष्णुः**

श्रृण्वन्ति श्रोणा–ममृतस्य गोपां । पुण्यामस्या उपश्रृणोमि वाचं ।
महीं देवीं विष्णुपत्नी मजूर्यां । प्रतीची मेना॑ हविषा यजामः ।
त्रेधा विष्णु–रुरुगायो विचक्रमे । महीं दिवं पृथिवी–मन्तरिक्षं ।
तच्छ्रोणैति श्रव–इच्छमाना । पुण्य॑ श्लोकं ँयजमानाय कृण्वती ॥ **22**

**23. नक्षत्रं – श्रविष्ठा** **देवता – वसवः**

अष्टौ देवा वसवस्सोम्यासः । चतस्रो देवी रजराः श्रविष्ठाः ।
ते यज्ञं पान्तु रजसः परस्तात् । संवँथ्सरीण–ममृत७ स्वस्ति ।
यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतो–ऽभियन्तु श्रविष्ठाः ।
पुण्यन्नक्षत्रमभि सँविशाम । मा नो अराति–रघश७ सागन्न् ॥ 23

**24. नक्षत्रं – शतभिषक्** **देवता – वरुणः**

क्षत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणा७ शतभिषग् वसिष्ठः ।
तौ देवेभ्यः कृणुतो दीर्घमायुः । शत७ सहस्रा भेषजानि धत्तः ।
यज्ञन्नो राजा वरुण उपयातु । तन्नो विश्वे अभिसँय्यन्तु देवाः ।
तन्नो नक्षत्र७ शतभिषग् जुषाणं । दीर्घमायुः प्रतिरद् भेषजानि ॥ 24

**25. नक्षत्रं – पूर्वप्रोष्ठपदा** **देवता – अजयेकपादः**

अज एकपा- दुदगात् पुरस्तात् । विश्वा भूतानि प्रति मोदमानः ।
तस्य देवाः प्रसवं यँन्ति सर्वे । प्रोष्ठपदासो अमृतस्य गोपाः ।

विभ्राजमान-स्समिधा न उग्रः । आऽन्तरिक्ष-मरुहद-गन्धां ।
तꣳ सूर्यं देव-मजमेकपादं । प्रोष्ठपदासो अनुयन्ति सर्वे ॥ 25

**26. नक्षत्रं – उत्तरप्रोष्ठपदा** **देवता – अहिर्बुद्ध्नियः**

अहि र्बुद्ध्नियः प्रथमान एति । श्रेष्ठो देवानामुत मानुषाणां ।
तं ब्राह्मणा-स्सोमपा-स्सोम्यासः । प्रोष्ठपदासो अभिरक्षन्ति सर्वे ।
चत्वार एकमभि कर्म देवाः । प्रोष्ठपदास इति यान् वदन्ति ।
ते बुद्धनियं परिषद्यꣳ स्तुवन्तः । अहिꣳ रक्षन्ति नमसोप सद्य ॥ 26

**27. नक्षत्रं – रेवती** **देवता – पूषा**

पूषा रेवत्यन्वेति पन्थां । पुष्टिपती पशुपा वाजबस्त्यौ ।
इमानि हव्या प्रयता जुषाणा । सुगैर्नो यानैरुपयातां ँयज्ञं ।
क्षुद्रान् पशून् रक्षतु रेवती नः । गावो नो अश्वाꣳ अन्वेतु पूषा ।
अन्नꣳ रक्षन्तौ बहुधा विरूपं । वाजꣳ सनुतां ँयजमानाय यज्ञं ॥ 27

**28 नक्षत्रं – अश्विनी** **देवता – अश्विनी देवौ**

तदश्विना–वश्वयुजो–पयातां । शुभङ्गमिष्ठौ सुयमेभिरश्वैः ।
स्वन्नक्षत्र७ँ हविषा यजन्तौ । मध्वा–संपृक्तौ यजुषा समक्तौ ।
यौ देवानां भिषजौ हव्यवाहौ । विश्वस्य दूता–वमृतस्य गोपौ ।
तौ नक्षत्रं–जुजुषाणो–पयातां । नमोऽश्विभ्यां कृणुमो–ऽश्वग्युभ्यां ॥ **28**

**29.नक्षत्रं – अपभरणी** **देवता – यमः**

अप पाप्मानं भरणी र्भरन्तु । तद् यमो राजा भगवान् विचष्टां ।
लोकस्य राजा महतो महान् हि । सुगन्नः पन्थामभयं कृणोतु ।
यस्मिन् नक्षत्रे यम एति राजा । यस्मिन्नेन–मभ्यषिंचन्त देवाः ।
तदस्य चित्र७ँ हविषा यजाम । अप पाप्मानं भरणी र्भरन्तु ॥ **29**

**30.अमावासि**

निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्या–वेशयन्ती ।
सहस्र–पोष७ँ सुभगा रराणा सा न आगन् वर्चसा संविदाना ।

यत्ते देवा अदधु र्भागधेय–ममावास्ये संवँसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्ववारे रयिन्नो धेहि सुभगे सुवीरं ॥ 30

**Optional Additional Chanting (31 to 40)**

**31. चन्द्रमा**

नवो नवो भवति जायमानोऽह्नां केतु–रुषसा मेत्यग्रे ।
भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरिति दीर्घमायुः ॥
यमादित्या अꣳशुमाप्याययन्ति यमक्षित–मक्षितयः पिबन्ति ।
तेन नो राजा वरुणो बृहस्पति राप्याययन्तु भुवनस्य गोपाः ॥ 31

**32. अहो रात्री**

ये विरूपे समनसा संव्यँयन्ती । समानं तन्तुं परिता–तनाते ।
विभू प्रभू अनुभू विश्वतो हुवे । ते नो नक्षत्रे हवमाग–मेतं ।
वयं देवी ब्रह्मणा संविँदानाः । सुरत्नासो देववीतिं दधानाः ।
अहोरात्रे हविषा वर्द्धयन्तः । अति पाप्मान–मतिमुक्त्या गमेम ॥ 32

**33. उषा**

प्रत्युव दृश्यायती । व्युच्छन्ती दुहिता दिवः ।
अपो मही वृणुते चक्षुषा । तमो ज्योतिष्–कृणोति सूनरी ।
उदु स्त्रियास्सचते सूर्यः । स चा उद्यन्नक्षत्र मर्चिमत् ।
त वेदुषो व्युषि सूर्यस्य च । संभक्तेन गमेमहि ॥ 33

**34. नक्षत्रः**

तन्नो नक्षत्र मर्चिमत् । भानुमत्तेज उच्छरत् ।
उपयज्ञ–मिहागमत् । प्रनक्षत्राय देवाय । इन्द्रा येन्दुꣳ हवामहे ।
स न स्सविता सुवथ् सनिं । पुष्टिदां ँवीरवत्तमं ॥ 34

**35. सूर्यः**

उदुत्यं जातवेदसं देवं ँवहन्ति केतवः । दृशे विश्वाय सूर्यं ।
चित्रं देवाना मुदगादनीकं चक्षु र्मित्रस्य वरुणस्याग्नेः ।
आऽप्रा द्यावा पृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च ॥ 35

**36. अदितिः**

अदितिर्न उरुष्य–त्वदितिः शर्म यच्छतु । अदितिः पात्वꣳ हसः।
महीमूषु मातरꣳ सुव्रताना–मृतस्य पत्नी मवसे हुवेम ।
तुविक्षत्रा–मजरन्ती मुरूचीꣳ सुशर्माण–मदितिꣳ सुप्रणीतिं ॥ **36**

**37. विष्णुः**

इदं विष्णु र्विचक्रमे त्रेधा निदधे पदं । समूढमस्य पाꣳ सुरे ।
प्रतद्विष्णु स्तवते वीर्याय । मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेषु । अधिक्षियन्ति भुवनानि विश्वा ॥ **37**

**38. अग्निः**

अग्नि र्मूर्धा दिवः ककुत्पतिः पृथिव्या अयं ।
अपाꣳ रेताꣳसि जिन्वति ।
भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः ।
दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहं ॥ **38**

**39. अनुमती**

अनुनोऽद्यानुमति र्यज्ञं देवेषु मन्यतां ।
अग्निश्च हव्यवाहनो भवतां दाशुषे मयः ।
अन्विदनुमते त्वं मन्यासै शंच नः कृधि ।
क्रत्वे दक्षाय नो हिनु प्रण आयूꣳषि तारिषः ॥ 39

**40. हव्यवाहः (अग्निः)**

हव्यवाहमभि–मातिषाहं । रक्षोहणं पृतनासु जिष्णुं ।
ज्योतिष्मन्तं दीद्यतं पुरन्धिं । अग्निꣳ स्विष्ट कृतमा हुवेम ।
स्विष्ट मग्ने अभितत् पृणाहि । विश्वा देव पृतना अभिष्य ।
उरुन्नः पन्थां प्रदिशन् विभाहि । ज्योतिष्मद्धेह्य जरन्न आयुः ॥ 40

आयुष्टे विश्वतो दध दय मग्निर्वरेण्यः । पुनस्ते प्राण आयति परायक्ष्मꣳ
सुवामिते । आयुर्दा अग्ने हविषो जुषाणो घृत प्रतीको घृतयो निरेधि ।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि–रक्षतादिमं ॥

# 20 शान्ति पञ्चकं

ओं शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः ।

शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।

त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि ।

ऋतं वदिष्यामि । सत्यं वदिष्यामि ।

तन्मामवतु । तद्वक्तारमवतु । अवतु मां । अवतु वक्तारं ॥ 1

ओं शान्तिः शान्तिः शान्तिः ॥

ओं शन्नो मित्रः शं वरुणः । शन्नो भवत्वर्यमा । शन्न इन्द्रो बृहस्पतिः ।

शन्नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो ।

त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषं । ऋतमवादिषं ।

सत्यमवादिषं । तन्मामावीत् । तद्वक्तारमावीत् ।

आवीन्मां । आवीद्वक्तारं ॥ 2

ओं शान्तिः शान्तिः शान्तिः ॥

ओं सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्विना–वधीतमस्तु मा विद्विषावहै ॥ 3

ओं शान्तिः शान्तिः शान्तिः ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो

नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो

मामामृषयो मन्त्रकृतो मन्त्रपतयः परादु र्माऽहमृषीन् मन्त्रकृतो मन्त्रपतीन्

परादां वैँश्व–देवीं वाँचमुद्यास७ शिवा मदस्ताञ्जुष्टां देवेभ्यः

शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् ।

शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म प्रजापती ।

भूतं वँदिष्ये भुवनं वँदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये

ब्रह्म वदिष्ये सत्यं वँदिष्ये तस्मा अहमिद–मुपस्तरण–मुपस्तृण

उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां

भूयासं प्राणापानौ मृत्योर्मापातं प्राणापानौ मा मा हासिष्टं मधु

मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो
वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु
शोभायै पितरो ऽनुमदन्तु ॥ 4

ओं शान्तिः शान्तिः शान्तिः ॥

ओं तच्छं ँयोरावृणीमहे । गातुं ँयज्ञाय । गातुं ँयज्ञपतये ।
दैवी स्वस्तिरस्तु नः । स्वस्ति–र्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजं ।
शन्नो अस्तु द्विपदे । शं चतुष्पदे ॥ 5

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 21 रुद्र नमकं

ओं । गणानान्त्वा गणपतिं हवामहे कविं कवीना-मुपमश्र-वस्तमं ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिः सीद सादनं ॥
श्री महागणपतये नमः ॥

शं च मे , मयश्च मे, प्रियं च मे, ऽनुकामश्च मे,
कामश्च मे , सौमनसश्च मे, भद्रं च मे, श्रेयश्च मे,
वस्यश्च मे, यशश्च मे, भगश्च मे, द्रविणं च मे,
यन्ता च मे, धर्ता च मे, क्षेमश्च मे, धृतिश्च मे,
विश्वं च मे, महश्च मे, सँविच्च मे, ज्ञात्रञ्च मे,
सूश्च मे, प्रसूश्च मे, सीरं च मे, लयश्च म,
ऋतं च मे, ऽमृतं च मे, ऽयक्ष्मं च मे , ऽनामयच्च मे,

जीवातुश्च मे, दीर्घायुत्वं च मे, ऽनमित्रं च मे, ऽभयं च मे,
सुगं च मे, शयनं च मे, सूषा च मे, सुदिनं च मे ॥
ओं शान्तिः शान्तिः शान्तिः ॥

---

## प्रथमः अनुवाकः

ओं नमो भगवते रुद्राय ॥

ओं नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः । 1.1

या त इषुः शिवतमा शिवं बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय । 1.2

या ते रुद्र शिवा तनूरघोरा ऽपापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ता–भिचाकशीहि । 1.3

यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ।
शिवाङ्गिरित्र ताङ्कुरु मा हि॑ꣳसीः पुरुषं जगत् । 1.4

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नस्सर्वमि–ज्जगद यक्ष्मꣳ सुमना असत् । 1.5

अद्ध्यवोचदधि–वक्ता प्रथमो दैव्यो भिषक् ।
अहीꣳश्च सर्वान् जंभयन् थ्सर्वाश्च यातु धान्यः । 1.6

असौ यस्ताम्रो अरुण उत बभ्रुस्सुमङ्गलः ।
ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो ऽऽवैषाꣳ हेड ईमहे । 1.7

असौ यो ऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अदृशन्–नदृशन्–नुदहार्यः ।
उतैनं–ँविश्वा भूतानि स दृष्टो मृडयाति नः । 1.8

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्यो ऽकरन्नमः । 1.9

प्रमुंच धन्वन– स्त्वमुभयो–रार्त्नियोर्ज्यां ।
याश्च ते हस्त इषवः परा ता भगवो वप । 1.10

अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव । 1.11

विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः । 1.12

या ते हेति–र्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वत स्त्वमयक्ष्मया परिब्भुज । 1.13
नमस्ते अस्त्वायुधाया–नातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने । 1.14

परि ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मन्निधेहि तं ॥ 1 1.15

नमस्ते अस्तु भगवन् विश्वेश्वराय महादेवाय त्र्यंबकाय त्रिपुरान्तकाय त्रिकाग्नि–कालाय कालाग्नि–रुद्राय नीलकण्ठाय मृत्युञ्जयाय सर्वेश्वराय सदाशिवाय शङ्कराय श्रीमन्–महादेवाय नमः ॥

द्वितीयः अनुवाकः

नमो हिरण्य बाहवे सेनान्ये दिशांच पतये नमो 2.1
नमो वृक्षेभ्यो हरिकेशेभ्यः पशूनां पतये नमो 2.2
नमस्सस्पिञ्जराय त्विषीमते पथीनां पतये नमो 2.3
नमो बभ्लुशाय विव्याधिने–ऽन्नानां पतये नमो 2.4
नमो हरिकेशायोप–वीतिने पुष्टानां पतये नमो 2.5
नमो भवस्य हेत्यै जगतां पतये नमो 2.6
नमो रुद्राया–तताविने क्षेत्राणां पतये नमो 2.7

नमः॑ सू॒ताया–हन्त्या॑य॒ वना॑नां॒ पत॑ये॒ नमो॒ 2.8

नमो॒ रोहि॑ताय स्थ॒पत॑ये वृ॒क्षाणां॒ पत॑ये॒ नमो॒ 2.9

नमो॑ म॒न्त्रिणे॑ वाणि॒जाय॒ कक्षाणां॒ पत॑ये॒ नमो॒ 2.10

नमो॑ भुव॒न्तये॑ वारिवस्कृ॒ता–यौष॑धीनां॒ पत॑ये॒ नमो॒ 2.11

नम॑ उ॒च्चै–र्घो॑षाया क्र॒न्दय॑ते प॒त्ती॑नां पत॑ये॒ नमो॒ 2.12

नमः॑ कृत्स्नवी॒ताय॒ धाव॑ते॒ सत्त्व॑नां॒ पत॑ये॒ नमः॑ ॥ 2 2.13

तृतीयः अनुवाकः

नम॒स्स्सह॑मानाय निव्या॒धिन॑ आव्या॒धिनी॑नां॒ पत॑ये॒ नमो॒ 3.1

नमः॑ क॒कुभा॑य निष॒ङ्गिणे॑॑ स्ते॒ना॒नां॑ पत॑ये॒ नमो॒ 3.2

नमो॑ नि॒षङ्गि॑ण इषुधि॒मते॒ तस्क॑रा॒णां पत॑ये॒ नमो॒ 3.3

नमो॒ वञ्च॑ते परि॒वञ्च॑ते स्ताय॒ूनां पत॑ये॒ नमो॒ 3.4

नमो॑ नि॒चेर॑वे परि॒चरा॑यार॒ण्यानां॒ पत॑ये॒ नमो॒ 3.5

नमः॑ सृका॒विभ्यो॒ जिघा॑ꣳसद्भ्यो मुष्ण॒तां पत॑ये॒ नमो॒ 3.6

नमो॑ऽसि॒मद्भ्यो॒ नक्तं॒ चर॑द्भ्यः प्रकृ॒न्ता॒नां॒ पत॑ये॒ नमो॒ 3.7

नम उष्णीषिणे गिरिचराय कुलुञ्चानां पतये नमो 3.8

नम इषुमद्भ्यो धन्वाविभ्यश्च वो नमो 3.9

नम आतन्वानेभ्यः प्रतिदधानेभ्यश्च वो नमो 3.10

नम आयच्छद्भ्यो विसृजद्–भ्यश्च वो नमो 3.11

नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो 3.12

नम आसीनेभ्यः शयानेभ्यश्च वो नमो 3.13

नमस्स्वपद्भ्यो जाग्रद्–भ्यश्च वो नमो 3.14

नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो नमो 3.15

नमस्सभाभ्य–स्सभापतिभ्यश्च वो नमो 3.16

नमो अश्वेभ्यो ऽश्वपतिभ्यश्च वो नमः ॥ 3 ॥ 3.17

## चतुर्थः अनुवाकः

नम आव्याधिनीभ्यो विविद्ध्यन्तीभ्यश्च वो नमो 4.1

नम उगणाभ्य–स्तृꣳहतीभ्यश्च वो नमो 4.2

नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो 4.3

नमो॒ व्राते॑भ्यो॒ व्राते॑पतिभ्यश्च वो॒ नमो॒ 4.4

नमो॑ ग॒णेभ्यो॑ ग॒णप॑तिभ्यश्च वो॒ नमो॒ 4.5

नमो॒ विरू॑पेभ्यो वि॒श्वरू॑पेभ्यश्च वो॒ नमो॒ 4.6

नमो॑ म॒हद्भ्य॑ः क्षुल्ल॒के॑भ्यश्च वो॒ नमो॒ 4.7

नमो॑ र॒थिभ्यो॑ऽर॒थेभ्य॑श्च वो॒ नमो॒ 4.8

नमो॒ रथे॑भ्यो॒ रथ॑पतिभ्यश्च वो॒ नमो॒ 4.9

नम॒ः सेना॑भ्यस्से॒नानि॑भ्यश्च वो॒ नमो॒ 4.10

नम॑ः क्ष॒त्तृभ्य॑स्सङ्ग्रही॒तृभ्य॑श्च वो॒ नमो॒ 4.11

नम॒स्तक्ष॑भ्यो रथका॒रेभ्य॑श्च वो॒ नमो॒ 4.12

नम॒ः कुला॑लेभ्यः क॒र्मारे॑भ्यश्च वो॒ नमो॒ 4.13

नम॑ः पु॒ञ्जिष्टे॑भ्यो नि॒षादे॑भ्यश्च वो॒ नमो॒ 4.14

नम॑ इषु॒कृद्भ्यो॑ धन्व॒कृद्भ्य॑श्च वो॒ नमो॒ 4.15

नमो॑ मृग॒युभ्य॑श्श्व॒निभ्य॑श्च वो॒ नमो॒ 4.16

नम॒ः श्वभ्य॒श्श्वप॑तिभ्यश्च वो॒ नम॑ः ॥ 4 4.17

## पञ्चमः अनुवाकः

नमो भवाय च रुद्राय च नमश्शर्वाय च पशुपतये च
नमो नीलग्रीवाय च शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च
नम–स्सहस्राक्षाय च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च
नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च
नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृध्वने च
नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च
नमः शीघ्रियाय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च
नमः स्रोतस्याय च द्वीप्याय च ॥ **5**

## षष्ठः अनुवाकः

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च
नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्नियाय च
नमस्सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च
नम उर्वर्याय च खल्याय च नमश्लोक्याय चावसान्याय च

नमो वन्याय च कक्ष्याय च नमश्श्रवाय च प्रतिश्रवाय च

नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च

नमो वर्मिणे च वरूथिने च नमो बिल्मिने च कवचिने च

नमः श्रुताय च श्रुतसेनाय च ॥ 6

सप्तमः अनुवाकः

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च

नमो दूताय च प्रहिताय च नमो निषङ्गिणे चेषुधिमते च

नम स्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च

नमस्स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च

नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च

नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च

नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च

नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ 7

अष्टमः अनुवाकः

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च

नमश्शङ्गाय च पशुपतये च नम उग्राय च भीमाय च

नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च

नमो वृक्षेभ्यो हरिकेशेभ्यो

नमस्ताराय

नमश्शंभवे च मयोभवे च

नमश्शङ्कराय च मयस्कराय च नमश्शिवाय च शिवतराय च

नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च

नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च

नमश्शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ **8**

नवमः अनुवाकः

नम इरिण्याय च प्रपथ्याय च नमः कि९ंशिलाय च क्षयणाय च

नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च

नम–स्तल्प्याय च गेह्याय च  नमः काट्याय च गह्वरेष्ठाय च

नमो हृदय्याय च निवेष्प्याय च नमः पा᳚सव्याय च रजस्याय च

नमः शुष्क्याय च हरित्याय च  नमो लोप्याय चोलप्याय च

नम ऊर्व्याय च सूर्म्याय च  नमः पर्ण्याय च पर्णशद्याय च

नमोऽपगुरमाणाय चाभिघ्नते च  नम आक्खिदते च प्रक्खिदते च

नमो वः किरिकेभ्यो देवाना᳚ हृदयेभ्यो  नमो विक्षीणकेभ्यो

नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो  नम आमीवत्केभ्यः ॥ 9

<u>दशमः अनुवाकः</u>

द्रापे अन्धसस्पते दरिद्रन्नीललोहित ।

एषां पुरुषाणामेषां पशूनां मा भे र्माऽरो मो एषां  किञ्चनाममत् । 10.1

या ते रुद्र शिवा तनूश्शिवा विश्वाहभेषजी ।

शिवा रुद्रस्य भेषजी तया नो मृड जीवसे । 10.2

इमा॒ रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तिं ।
यथा॑ नः॒ शमस॑द्-द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॑ पु॒ष्टं ग्रामे॑ अ॒स्मि-न्ननातु॑रं । 10.3

मृ॒डा नो॑ रु॒द्रो॒ त॒नो॒ मय॑स्कृधि क्ष॒यद्वी॑राय॒ नम॑सा विधेम ते ।
यच्छ॒ञ्च॒ योश्च॒ मनु॑राय॒जे पि॒ता तद॑श्याम॒ तव॑ रुद्र॒ प्रणी॑तौ । 10.4

मा नो॑ म॒हान्त॑मु॒त मा नो॑ अर्भ॒कं मा न॒ उक्ष॑न्तमु॒त मा न॑ उक्षि॒तं ।
मा नो॑ वधीः पि॒त॒रं मोत मा॒तरं॑ प्रि॒या मा न॑स्त॒नुवो॑ रुद्र रीरिषः । 10.5

मा न॑स्तो॒के त॑न॒ये मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान्मा नो॑ रुद्र भामि॒तोव॑धी-र्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते । 10.6

आ॒रात्ते॑ गो॒घ्न उ॒त पू॑रुष॒घ्ने क्ष॒यद्वी॑राय सु॒म्न-म॒स्मे ते॑ अस्तु ।
रक्षा॑ च नो॒ अधि॑ च देव ब्रू॒ह्यधा॑ च नः॒ शर्म॑ यच्छद्वि॒बर्हाः । 10.7

स्तु॒हि श्रु॒तं ग॑र्त॒स॒दं यु॒वानं॑ मृ॒गन्न भी॒म-मु॑पह॒त्नु-मु॒ग्रं ।
मृ॒डा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो अ॒न्यन्ते॑ अ॒स्मन्निव॑पन्तु॒ सेनाः । 10.8

परिणो रुद्रस्य हेति र्वृणक्तु परित्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्य-स्तनुष्व मीढ्वस्तोकाय तनयाय मृडय । 10.9

मीढुष्टम शिवतम शिवो नस्सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि । 10.10
विकिरिद विलोहित नमस्ते अस्तु भगवः ।
यास्ते सहस्र७ हेतयोन्य-मस्मन्निवपन्तु ताः । 10.11
सहस्राणि सहस्रधा बाहुवोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ॥ 10 ॥ 10.12

<u>एकादशः अनुवाकः</u>

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्यां ।
तेषा७ सहस्रयोजने ऽवधन्वानि तन्मसि । 11.1
अस्मिन्-महत्यर्णवे-ऽन्तरिक्षे भवा अधि । 11.2
नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः । 11.3

नीलग्रीवा–श्शितिकण्ठा दिव७ रुद्रा उपश्रिताः । 11.4

ये वृक्षेषु सस्पिञ्जरा नीलग्रीवा विलोहिताः । 11.5

ये भूताना–मधिपतयो विशिखासः कपर्दिनः । 11.6

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् । 11.7

ये पथां पथिरक्षय ऐलबृदा यव्युधः । 11.8

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः । 11.9

य एतावन्तश्च भूया७ंसश्च दिशो रुद्रा वितस्थिरे ।

तेषा७ं सहस्रयोजने ऽवधन्वानि तन्मसि । 11.10

नमो रुद्रेभ्यो ये पृथिव्यां यें ऽन्तरिक्षे ये दिवि येषामन्नं वातो

वर्षमिषवस्–तेभ्यो दश प्राची र्दशदक्षिणा दशप्रतीची

र्दशोदीची र्दशोर्ध्वा–स्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो

द्वेष्टि तं वो जंभे दधामि ॥ 11 11.11

त्र्यंबकादि महामन्त्रः

त्र्यंबकं यँजामहे सुगन्धिं पुष्टिवर्धनं ।
उर्वारुकमिव बन्धनान् मृत्यो मुक्षीय माऽमृतात् ॥ 1

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा
भुवना ऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥ 2

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्षयति भेषजस्य ।
यक्ष्वामहे सौमनसाय रुद्रं नमोभि–र्देवमसुरं दुवस्य ॥ 3
अयं मे हस्तो भगवानयं मे भगवत्तरः ।
अयं मे विश्व–भेषजोयꣳ शिवाभिमर्शनः ॥ 4
ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे ।
तान् यज्ञस्य मायया सर्वानव यजामहे ॥ 5
मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ 6

ओं नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥ 7

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 22 चमकं

प्रथमः अनुवाकः

ओं अग्नाविष्णू सजोषसेमा वर्द्धन्तु वाङ्गिरः । ध्युंनै-र्वाजे-भिरागतं ॥

वाजश्च मे, प्रसवश्च मे, प्रयतिश्च मे, प्रसितिश्च मे,

धीतिश्च मे, क्रतुश्च मे , स्वरश्च मे, श्लोकश्च मे,

श्रावश्च मे , श्रुतिश्च मे, ज्योतिश्च मे , सुवश्च मे,

प्राणश्च मे, ऽपानश्च मे , व्यानश्च मे, ऽसुश्च मे,

चित्तं च म, आधीतं च मे, वाक्च मे, मनश्च मे,

चक्षुश्च मे , श्रोत्रं च मे , दक्षश्च मे , बलं च म,

ओजश्च मे , सहश्च म, आयुश्च मे, जरा च म,
आत्मा च मे, तनूश्च मे, शर्म च मे, वर्म च मे,

ऽङ्गानि च मे, ऽस्थानि च मे, परूꣳषि च मे, शरीराणि च मे ॥ **1 (36)**

द्वितीयः अनुवाकः

ज्यैष्ठ्यं च म, आधिपत्यं च मे, मन्युश्च मे, भामश्च मे,
ऽमश्च मेऽ, म्भश्च मे, जेमा च मे, महिमा च मे,

वरिमा च मे, प्रथिमा च मे, वर्ष्मा च मे , द्राघुया च मे,
वृद्धं च मे, वृद्धिश्च मे, सत्यं च मे, श्रद्धा च मे,

जगच्च मे, धनं च मे, वशश्च मे, त्विषिश्च मे,
क्रीडा च मे, मोदश्च मे, जातं च मे, जनिष्यमाणं च मे,

सूक्तं च मे , सुकृतं च मे, वित्तं च मे, वेद्यं च मे,
भूतंच मे, भविष्यच्च मे , सुगं च मे, सुपथं च म,

ऋद्धं च म, ऋद्धिश्च मे, क्लृप्तं च मे, क्लृप्तिश्च मे,
मतिश्च मे, सुमतिश्च मे ॥ **2 (38)**

<u>त्रितीयः अनुवाकः</u>

शं च मे , मयश्च मे, प्रियं च मे, ऽनुकामश्च मे,
कामश्च मे , सौमनसश्च मे, भद्रं च मे, श्रेयश्च मे,

वस्यश्च मे, यशश्च मे, भगश्च मे, द्रविणं च मे,
यन्ता च मे, धर्ता च मे, क्षेमश्च मे, धृतिश्च मे,

विश्वं च मे, महश्च मे, सँविच्च मे, ज्ञात्रं च मे,
सूश्च मे, प्रसूश्च मे, सीरं च मे, लयश्च म ,

ऋतं च मे, ऽमृतं च, मेऽयक्ष्मं च मे, ऽनामयच्च मे,
जीवातुश्च मे, दीर्घायुत्वं च मे, ऽनमित्रं च मे, ऽभयं च मे,

सुगं च मे, शयनं च मे, सूषा च मे, सुदिनं च मे ॥ **3 (36)**

<u>चतुर्थः अनुवाकः</u>

ऊर्क्च मे, सूनृता च मे , पयश्च मे , रसश्च मे,
घृतं च मे, मधु च मे , सग्धिश्च मे, सपीतिश्च मे,

कृषिश्च मे, वृष्टिश्च मे, जैत्रं च म, औद्भिध्यं च मे ,
रयिश्च मे, रायश्च मे , पुष्टं च मे, पुष्टिश्च मे,

विभु च मे, प्रभु च मे, बहु च मे, भूयश्च मे,
पूर्णं च मे, पूर्णतरं च मे ऽक्षितिश्च मे, कूयवाश्च मे,

ऽन्नं च मे, ऽक्षुच्च मे, व्रीहयश्च मे, यवाश्च मे,
माषाश्च मे, तिलाश्च मे, मुद्गाश्च मे, खल्वाश्च मे,

गोधूमाश्च मे , मसुराश्च मे, प्रियंगवश्च मे ऽणवश्च मे,
श्यामाकाश्च मे, नीवाराश्च मे ॥ **4 (38)**

पञ्चमः अनुवाकः

अश्मा च मे, मृत्तिका च मे, गिरयश्च मे, पर्वताश्च मे,
सिकताश्च मे, वनस्पतयश्च मे, हिरण्यं च मे, ऽयश्च मे ,

सीसं च मे, त्रपुश्च मे, श्यामं च मे, लोहं च मे,
ऽग्निश्च म, आपश्च मे, वीरुधश्च म, ओषधयश्च मे,

कृष्टपच्यं च मे, ऽकृष्टपच्यं च मे,
ग्रांयाश्च मे, पशव आरण्याश्च यज्ञेन कल्पन्तां ,

वित्तं च मे, वित्तिश्च मे, भूतं च मे, भूतिश्च मे,
वसु च मे, वसतिश्च मे, कर्म च मे, शक्तिश्च मे,

ऽर्थश्च म, एमश्च म, इतिश्च मे, गतिश्च मे ॥ **5 (32)**

षष्ठः अनुवाकः

अग्निश्च म इन्द्रश्च मे, सोमश्च म इन्द्रश्च मे,
सविता च म इन्द्रश्च मे, सरस्वती च म इन्द्रश्च मे,

पूषा च म इन्द्रश्च मे, बृहस्पतिश्च म इन्द्रश्च मे,
मित्रश्च म इन्द्रश्च मे, वरुणश्च म इन्द्रश्च मे,

त्वष्टा च म इन्द्रश्च मे, धाता च म इन्द्रश्च मे,
विष्णुश्च म इन्द्रश्च मे , ऽश्विनौ च म इन्द्रश्च मे,
मरुतश्च म इन्द्रश्च मे, विश्वे च मे,
देवा इन्द्रश्च मे, पृथिवी च म इन्द्रश्च मे,

ऽन्तरिक्षं च म इन्द्रश्च मे, द्यौश्च म इन्द्रश्च मे,
दिशश्च म इन्द्रश्च मे, मूर्ध्दा च म इन्द्रश्च मे,
प्रजापतिश्च म इन्द्रश्च मे ॥ **6 (21)**

*सप्तमः अनुवाकः*

अꣳशुश्च मे, रश्मिश्च मे, ऽदाभ्यश्च मे, ऽधिपतिश्च म,
उपाꣳशुश्च मे, ऽन्तर्यामश्च म, ऐन्द्रवायवश्च मे, मैत्रावरुणश्च म,

आश्विनश्च मे, प्रतिप्रस्थानश्च मे, शुक्रश्च मे, मन्थी च म,
आग्रयणश्च मे, वैश्वदेवश्च मे, ध्रुवश्च मे, वैश्वानरश्च म,
ऋतुग्रहाश्च मे, ऽतिग्राह्याश्च म, ऐन्द्राग्नश्च मे, वैश्वदेवश्च मे,
मरुत्वतीयाश्च मे, माहेन्द्रश्च म, आदित्यश्च मे, सावित्रश्च मे,
सारस्वतश्च मे, पौष्णश्च मे, पात्नीवतश्च मे, हारियोजनश्च मे ॥ **7 (28)**

अष्टमः अनुवाकः

इध्मश्च मे, बर्हिश्च मे, वेदिश्च मे, धिष्णियाश्च मे,
स्रुचश्च मे, चमसाश्च मे, ग्रावाणश्च मे, स्वरवश्च म,
उपरवाश्च मे, ऽधिषवणे च मे, द्रोणकलशश्च मे, वायव्यानि च मे,
पूतभृच्च म, आधवनीयश्च म, आग्नीध्रं च मे, हविर्धानं च मे,
गृहाश्च मे, सदश्च मे, पुरोडाशाश्च मे, पचताश्च मे,
ऽवभृथश्च मे, स्वगाकारश्च मे ॥ **8 (22)**

*नवमः अनुवाकः*

अग्निश्च मे, घर्मश्च मे, ऽर्कश्च मे, सूर्यश्च मे,
प्राणश्च मे, ऽश्वमेधश्च मे, पृथिवी च मे, ऽदितिश्च मे,

दितिश्च मे, द्यौश्च मे,
शक्वरीरङ्गुलयो–दिशश्च मे, यज्ञेन कल्पन्ता– मृक्च मे,
साम च मे, स्तोमश्च मे, यजुश्च मे, दीक्षा च मे,

तपश्च म, ऋतुश्च मे ,
व्रतं च मे ऽहोरात्रयो वृष्ट्या,
बृहद्रथन्तरे च मे यज्ञेन कल्पेतां ॥ **9 (21)**

*दशमः अनुवाकः*

गर्भाश्च मे, वथ्साश्च मे, त्र्यविश्च मे, त्र्यवीच मे ,
दित्यवाट् च मे, दित्यौही च मे, पञ्चाविश्च मे, पञ्चावी च मे,

त्रिवथ्सश्च मे, त्रिवथ्सा च मे, तुर्यवाट् च मे, तुर्यौही च मे,
पष्ठवाट् च मे, पष्ठौही च म, उक्षा च मे, वशा च म

ऋषभश्च मे, वेहच्च मे, ऽनड्वां च मे, धेनुश्च म

आयुर्-यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पता-
मपानो यज्ञेन कल्पतां , ँव्यानो यज्ञेन कल्पतां
चक्षु-र्यज्ञेन कल्पता७ँ, श्रोत्रं ँयज्ञेन कल्पतां
मनो यज्ञेन कल्पतां , ँवाग्यज्ञेन कल्पता-
मात्मा यज्ञेन कल्पतां , ँयज्ञो यज्ञेन कल्पतां ॥ **10 (29)**

<u>एकादशः अनुवाकः</u>

एका च मे, तिस्रश्च मे, पञ्च च मे, सप्त च मे,
नव च म, एकादश च मे, त्रयोदश च मे, पञ्चदश च मे,

सप्तदश च मे, नवदश च म, एकवि७ँशतिश्च मे,
त्रयोवि७ँशतिश्च मे, पञ्चवि७ँशतिश्च मे, सप्त वि७ँशतिश्च मे,

नवविंशतिश्च म, एकत्रिंशच्च मे,

त्रयस्त्रिंशच्च मे, चतस्रश्च मे, ऽष्टौ च मे , द्वादश च मे,
षोडश च मे, विंशतिश्च मे, चतुर्विंशतिश्च मे, ऽष्टाविंशतिश्च मे,

द्वात्रिंशच्च मे, षट्–त्रिंशच्च मे,
चत्वारिंशच्च मे , चतुश्–चत्वारिंशच्च मे, ऽष्टाचत्वारिंशच्च मे
वाजश्च, प्रसवश्चा–पिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्–श्चान्त्यायन–
श्चान्त्यश्च भौवनश्च भुवनश्चा–धिपतिश्च ॥ **11 (41)**
ओं इडा देवहू–र्मनु–र्यज्ञनी बृहस्पति–रुक्थामदानि शंसिषद्–
विश्वे–देवाः सूक्तवाचः पृथिविमातर्मा मा हिंसी–र्मधु
मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं
देवेभ्यो वाचमुद्यासं–शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु
शोभायै पितरो ऽनुमदन्तु ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 23 पुरुष सूक्तं

ओं । सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं ँविश्वतो वृत्वा । अत्यतिष्ठ–द्दशाङ्गुलं । पुरुष एवेदꣳ सर्वं ।
यद् भूतं ँयच्च भव्यं । उतामृतत्व–स्येशानः । यदन्नेनाति–रोहति ।
एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः ॥ 1

पादोऽस्य विश्वा भूतानि । त्रिपादस्या–मृतन्दिवि । त्रिपादूर्द्ध्व उदैत्
पुरुषः । पादोस्येहा ऽऽभवात्पुनः । ततो विष्वङ् व्यक्रामत् ।
साशनानशने अभि । तस्माद् विराड जायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद् भूमिमथो पुरः ॥ 2

यत् पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्या–सीदाज्यं ।
ग्रीष्म इद्ध्म–श्शरद्धविः । सप्तास्यासन् परिधयः ।
त्रिस्सप्त समिधः कृताः । देवा यद् यज्ञं–तन्वानाः ।
अबद्ध्नन् पुरुषं पशुं । तं ँयज्ञं बर्हिषि प्रौक्षन्न् । पुरुषं जातमग्रतः ॥ 3

तेन देवा अयजन्त । साद्ध्या ऋषयश्च ये । तस्माद्यज्ञात् सर्वहुतः ।
संभृतं पृषदाज्यं । पशूꣳस्ताꣳश्चक्रे वायव्यान् । आरण्यान्–ग्राम्याश्च ये ।
तस्माद्यज्ञात् सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दाꣳसि जज्ञिरे तस्मात् ।
यजुस्तस्मा दजायत ॥ 4

तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् ।
तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते ।
ब्राह्मणोस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ 5

ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳ शूद्रो अजायतः ।
चन्द्रमा मनसो जातः । चक्षो–स्सूर्यो अजायत । मुखादिन्द्र–श्चाग्निश्च ।
प्राणाद् वायु–रजायत । नाभ्या आसीदन्तरिक्षं । शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमि र्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् ॥ 6

वेदाहमेतं पुरुषं महान्तं । आदित्यवर्णं तमसस्तु पारे ।

सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाभिवदन् यदास्ते ।

धाता पुरस्ता–द्यमुदा जहार । शक्रः प्रविद्वान्–प्रदिशश्चतस्रः ।

तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते ।

यज्ञेन यज्ञ–मयजन्त देवाः । तानि धर्माणि प्रथमान्यासन्न् ।

ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साद्ध्या–स्सन्ति देवाः ॥ **7**

(ओं शान्तिः शान्तिः शान्तिः ॥)

**“ ओं नमो नारायणाय ”**

(It is customary to chant this during continous chanting of Uttara Narayanam)

---

# 24 उत्तर नारायणं

अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्त्तताधि ।
तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्व माजानमग्रे ॥ 1

वेदाहमेतं पुरुषं महान्तं । आदित्य वर्णं तमसः परस्तात् ।
तमेवं ँविद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय ॥ 2

प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ।
तस्य धीराः परिजानन्ति योनिं । मरीचीनां पदमिच्छन्ति वेधसः ॥ 3

यो देवेभ्य आतपति । यो देवानां पुरोहितः ।
पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये ॥ 4

रुचं ब्राह्मञ्जनयन्तः । देवा अग्रे तदब्रुवन्न् ।
यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे ॥ 5

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे ।
नक्षत्राणि रूपं । अश्विनौ व्यात्तं ।
इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ 6

# 25 महा नारायणं

सहस्रशीर्षं देवं ँविश्वाक्षं ँविश्वशं भुवं ।
विश्वं नारायणं देवमक्षरं परमं पदं ॥ 1

विश्वतः परमान्नित्यं ँविश्वं नारायण॑ हरिं ।
विश्वमेवेदं पुरुष स्तद्विश्व–मुपजीवति ॥ 2

पतिं ँविश्वस्यात्मेश्वर॑ शाश्वत॑ शिवमच्युतं ।
नारायणं महाज्ञेयं ँविश्वात्मानं परायणं ॥ 3
नारायण परो ज्योतिरात्मा नारयणः परः ॥ 4
नारायण परं ब्रह्म तत्त्वं नारायणः परः ।
नारायण परो ध्याता ध्यानं नारायणः परः ।

यच्च किञ्चिज्-जगथ्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्त र्बहिश्च तथ् सर्वं ँव्याप्य नारायणः स्थितः ॥ 5

अनन्त मव्ययं कवि७् समुद्रेऽन्तं ँविश्वशंभुवं ।
पद्मकोश-प्रतीकाश७् हृदयं चाप्यधोमुखं ॥ 6

अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति ।
ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । ॥ 7

सन्तत७् शिलाभिस्तु लंबत्या कोशसन्निभं ।
तस्यान्ते सुषिर७् सूक्ष्मं तस्मिन्थ् सर्वं प्रतिष्ठितं ॥ 8

तस्य मध्ये महानग्नि र्विश्वार्चि र्विश्वतो मुखः ।
सोऽग्रभुग् विभजन् तिष्ठन्नाहार-मजरः कविः ॥ 9

तिर्यगूद्ध्वं मधश्शायी रश्मयस्तस्य सन्तता ।
सन्तापयति स्वं देहमापादतल मस्तकः ।
तस्य मध्ये वह्नि शिखा अणीयोद्ध्वा व्यवस्थितः ॥ 10

नीलतो यद मध्यस्थाद् विद्युल्लेखेव भास्वरा ।
नीवार शूकवत्तन्वी पीता भास्वत्यणूपमा ॥ 11

तस्याः शिखाया मद्ध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ 12

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलं ।
ऊर्ध्वरेतं विरूपाक्षं ँविश्वरूपाय वै नमो नमः ॥
नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥
विष्णोर्नुकं ँवीर्याणि प्रवोचं ँयः पार्थिवानि विममे राजाꣳसि यो
अस्कभाय–दुत्तरꣳ सधस्थं ँविचक्रमाण–स्त्रेधोरुगायो
विष्णो–रराटमसि विष्णोः पृष्ठमसि विष्णो श्ञप्त्रेस्थो विष्णो–स्स्यूरसि
विष्णो ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

*विष्णवे नारायणाय नमः ॥ (ओं शान्तिः शान्तिः शान्तिः ॥)

# 26 घोष शान्ति

शन्नो वातः पवतां मातरिश्वा शन्न स्तपतु सूर्यः ।

अहानि शं भवन्तु न श्शꣳ रात्रिः प्रतिधीयतां ॥

शमुषा नो व्युच्छतु शमादित्य उदेतु नः ।

शिवा न श्शन्तमाभव सुमृडीका सरस्वति । माते व्योम सन्दृशि || 1

इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मा वास्तोश्छित्थ्स्

मह्यवास्तु स्स भूयात् योऽस्मान् द्वेष्टि यं च वयं द्विष्मः ॥

प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाछित्थ्स् मह्य प्रतिष्ठ–स्स

भूयात् योऽस्मान् द्वेष्टि यं च वयं द्विष्मः || 2

आवात वाहि भेषजं ँविवात–वाहि यद्रपः ।

त्वꣳहि विश्वभेषजो देवानां दूत ईयसे ॥

द्वाविमौ वातौ वात आसिन्धोरा परावतः ।

दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः ॥

यददो वात ते गृहेऽमृतस्य निधि र्हितः ।

ततो नो देहि जीवसे ततो नो धेहि भेषजं ।

ततो नो मह आवह वात आवातु भेषजं ॥

शंभूर्–मयोभुर्–नो हृदे प्रण आयुंषि तारिषत् ।

इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुस्साश्वः ।

सह यन्मे अस्ति तेन || 3

भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः प्रपद्ये वायुं

प्रपद्येऽनार्त्तां देवतां प्रपद्ये–ऽश्मानमाखणं प्रपद्ये प्रजापते

र्ब्रह्मकोशं ब्रह्म प्रपद्य ओं प्रपद्ये ॥

अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातः स्वस्त्या

स्वस्तिमान्तया स्वस्त्या स्वस्ति मानसानि ॥

प्राणापानौ मृत्यो र्मा पातं प्राणापानौ मा मा हासिष्ठं
मयि मेधां मयि प्रजां मय्यग्नि स्तेजो दधातु
मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु
मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु || 4

द्युभिरक्तुभिः परिपात–मस्मान–रिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो मामहन्ता–मदितिः–सिन्धुः पृथिवी उतद्यौः ॥
कयानश्चित्र आभुव दूती सदावृध स्सखा । कयाशचिष्ठया वृता ॥
कस्त्वा सत्यो मदानां मꣳहिष्ठो मथ्सदन्धसः । दृढा–चिदा–रुजे–वसु ॥
अभीषुण स्सखीना–मविता–जरित्–ऋृणां । शतं भवास्यूतिभिः ॥
वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः ।
अपद्ध्वान्तमूर्णुहि पूर्द्धिचक्षु र्मुमुग्ध्यस्मा–न्निधयेव बद्धान् ॥
शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शँयो–रभिस्रवन्तुनः ॥
ईशाना वार्याणां क्षयन्तीः चर्षणीनां । अपो याचामि भेषजं ॥

सुमित्रान आप ओषधय स्सन्तु दुर्मित्रास्तस्मै भूयासु–र्योऽस्मान्
द्वेष्टि यं च वयं द्विष्मः || 5

आपोहिष्ठा मयोभुव–स्तान ऊर्जे दधातन । महे रणाय चक्षसे ।
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।
तस्मा अरं गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा चनः ॥
पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुच७ँ शमयतु ।
अन्तरिक्ष७ँ शान्तं तद् वायुना शान्तं तन्मे शान्त७ँ शुच७ँ शमयतु ।
द्यौः शान्ता साऽऽदित्येन शान्ता सा मे शान्ता शुच७ँ शमयतु || 6

पृथिवी शान्तिरन्तरिक्ष७ँ शान्तिर् द्यौ श्शान्तिर् दिशः शान्ति–
रवान्तरदिशाः–शान्ति–रग्निश्शान्तिर्–वायुश्शान्ति–रादित्य श्शान्ति–
श्चन्द्रमा श्शान्तिर्–नक्षत्राणि शान्ति–रापश्शान्ति–रोषधय श्शान्तिर्–
वनस्पतय श्शान्तिर्–गौ श्शान्ति–रजा शान्ति–रश्व श्शान्तिः

पुरुष श्शान्तिर् ब्रह्म शान्तिर् ब्राह्मण श्शान्ति–श्शान्ति–रेव
शान्ति श्शान्तिर् मे अस्तु शान्तिः ॥
तयाऽहꣳ शान्त्या सर्व शान्त्या मह्यं द्विपदे चतुष्पदे च
शान्तिं करोमि शान्ति में अस्तु शान्तिः ‖ 7

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि
मोत्तिष्ठन्त–मनूत्तिष्ठन्तु मामाꣳ श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा
श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः ॥
उदायुषा स्वायुषो–दोषधीनाꣳ रसेनोत् पर्जन्यस्य शुष्मेणोदस्था–ममृताꣳ
अनु ॥ तच्चक्षु र्देवहितं पुरस्ता–च्छुक्रमुच्चरत् ‖ 8

पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं
भवाम शरदश्शतꣳ श्रृणवाम शरदश्शतं प्रब्रवाम शरदश्शत–
मजीतास्याम शरदश्शतं जोक्च सूर्यं दृशे ॥

य उदगान् महतोऽर्णवान् विभ्राजमान–स्सरिरस्य मद्ध्याथ्स मा वृषभो

लोहिताक्ष स्सूर्यो विपश्चिन् मनसा पुनातु || 9

ब्रह्मणश्चोतन्यसि ब्रह्मण आणीस्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी

ब्रह्मणा महि धारित–मेनेन महदन्तरिक्षं दिवं दाधार पृथिवी॑ँ सदेवाँ

–यदहँ–व्वेद तदहं धारयाणि मामद्वेदोऽधि विस्रसत् ।

मेधामनीषे माविशता॑ँ समीची भूतस्य भव्यस्यावरुद्ध्यै

सर्वमायुरयाणि सर्वमायुरयाणि ॥ 10

आभिर् गीर्भि र्यदतोन ऊनमाप्यायय हरिवो वर्द्धमानः ।

यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अधते श्याम ।

ब्रह्म प्रावादिष्म तन्नो माहासीत् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

**(Shanti Japam ends )**

# 27 हिरण्यगर्भ सूक्तं

1. हिरण्यगर्भ स्समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
स दाधार पृथिवीं ध्यामुतेमां कस्मै देवाय हविषा विधेम ॥

2. यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम ॥

3. य आत्मदा बलदा यस्य विश्व उपासदे प्रशिषं ँयस्य देवाः ।
यस्य छायाऽमृतं ँयस्य मृत्युः कस्मै देवाय हविषा विधेम ॥

4. यस्येमे हिमवन्तो महित्वा यस्य समुद्र७ रसया सहाऽऽहुः ।
यस्येमाः प्रदिशो यस्य बाहु कस्मै देवाय हविषा विधेम ॥

5. यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने ।
यत्राधिसूर उदितौ व्येति कस्मै देवाय हविषा विधेम ॥

6. येन द्यौरुग्रा पृथिवी च दृढे येन सुवस् स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥

7. आपो ह यन्महती र्विश्वमा–यन्दक्षन्दधाना जनयन्तीरग्निं ।
ततो देवाना–न्निरवर्त्तता–सुरेकः कस्मै देवाय हविषा विधेम ॥

8. यश्चिदापो महिना पर्यपश्य द्दक्षन्दधाना जनयन्तीरग्निं ।
यो देवेष्वधि देव येक आसीत् कस्मै देवाय हविषा विधेम ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 28 वेद काण्ड तैत्तिरीय संहिता

## 28.1 प्रथमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

इषेत्वोर्जेत्वा वायवस्थो पायवस्स्थ देवोवस्स्सविता प्रार्पयतु श्रेष्ठ
तमाय कर्मण आप्यायद्ध्व –मघ्निया देवभाग मूर्जस्वतीः पयस्वतीः
प्रजावती–रनमीवा अयक्ष्मा मावस्स्तेन ईशतमा–ऽघश७् सो रुद्रस्य हेतिः
परिवो वृणक्तु ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्–यजमानस्य पशून् पाहि ॥

## 28.2 द्वितीयकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

वायव्य७् श्वेतमा लभेत भूति कामो वायुर्वै–क्षेपिष्ठा देवता वायुमेवस्वेन
भागधेये नोप धावति स एवैनं भूतिं गमयति भवत्येवाति क्षिप्रा देवतेत्या
हुस्सैन मीश्वरा प्रदह इत्येतमेव सन्तं वाँयवे नियुत्वत आलभेत नियुद्वा
अस्य धृतिर्धृत एव भूति मुपैत्य प्रदाहाय भवत्येव ॥

## 28.3 तृतीयकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

प्रजापतिर कामयत, प्रजा-स्सृजेयेति सतपो तप्यत, स सर्पा न सृजत सोऽकामयत, प्रजा-स्सृजेयेति स द्वितीय म तप्यत, सवयाꣳस्य सृजत, सोऽकामयत प्रजा-स्सृजेयेति, स तृतीय म तप्यत, स एतं दीक्षित वादम पश्यत्तम, वदत्ततो वै स प्रजा असृजत, यत्तप-स्तप्त्वा दीक्षित वादं ँवदति प्रजा एव तद्यजमानः ॥

## 28.4 चतुर्थकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

युञ्जानः प्रथमं मनस्तत्वाय सविता धियः । अग्निं ज्योति-र्निचाय्य पृथिव्या अद्ध्याऽभरत् । युक्त्वाय मनसा देवान्-थ्सुवर्य तो धिया दिवं । बृहज्ज्योतिः करिष्यत स्सविता प्रसुवाति तान् । युक्तेन मनसा वयं देवस्य सवितुस्सवे । सुवर्गेयाय शक्त्यै । युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः । विहोत्रादधे वयुना विदेक इत् ॥

## 28.5 पञ्चमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोति, चतुष्पादः पशवः पशूनेवा वरुन्धे चतस्रो दिशो दिक्ष्वेव प्रतितिष्ठति, छन्दा॑ँसि देवेभ्यो ऽपाक्रा मन्नवो ऽभागानि हव्यं, वँक्ष्याम इति तेभ्य एतच्चतुर् गृहीतम धारयन्, पुरोनु वाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुर् गृहीतं, जुहोति छन्दा॑ँस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यं वँहन्ति यं कामयेत ॥

## 28.6 षष्टमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

प्राचिनव॑ँ शङ्करोति, देवमनुष्या दिशो–व्यभजन्त, प्राचीन्देवा दक्षिणा पितरः प्रतीचीं मनुष्या, उदीची॑ँ रुद्रायत् प्राचीनव॑ँ शङ्करोति, देवलोकमेव तद्यजमान उपावर्तते परिश्रयत्यन्तर् हितोहि, देवलोको मनुष्य लोकान्नास्मा ँल्लोकाथ् , स्वेतव्य मिवे त्याहुः कोहित द्वेद यध्य मुष्मिन् ँल्लोकेऽस्ति–वानवेति दिक्ष्वती काशान् करोति ।

## 28.7 सप्तमकाण्डे प्रथमप्रश्नः प्रथमपञ्चातिः

प्रजननम् ज्योति–रग्निर्–देवतानाम् ज्योति र्विराट् , छन्दसाम् ज्योतिर्–विराड्–वाचोऽग्नौ सन्तिष्ठते विराजमभि संपद्यते , तस्मात्त–ज्ज्योति रुच्यते, द्वौ स्तोमौ प्रात स्सवनं , वँहतो यथा प्राणश्चा पानश्च, द्वौ माद्ध्यन्दिन७् सवनं–यँथा चक्षुश्च श्रोत्रञ्च, द्वौ तृतीय सवनं यँथा वाक्च प्रतिष्ठा च, पुरुष सम्मितो वा एष यज्ञोऽस्थूरिः ॥

## 28.8 सप्तमकाण्डे पञ्चमप्रश्नः अन्त्यपञ्चातिः

समुद्र उदरमन्तरिक्षं पायुर्द्यावा पृथिवी आण्डौ ग्रावा शेपस्सोमो रेतो यज्ञं जभ्यते तद्विद्योतते यद्विधूनुते तथ्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वा गहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनु–जायत एतौ वै महिमाना वश्व–मभित–स्संबभूव तुर्.हयो देवानवहदर्वा–ऽसुरान् वाजी गन्धर्वानश्वो मनुष्यान् थ्समुद्रोवा अश्वस्य योनि स्समुद्रो बन्धुः ॥

## 28.9 तैत्तिरीय यजुब्राह्मणम् –प्रथमाष्टके प्रथमप्रश्नः

प्रथमपञ्चातिः

ब्रह्म सन्धत्तं तन्मे जिन्वतं । क्षत्रꣳ सन्धत्तं तन्मे जिन्वतं ।
इषꣳ सन्धत्तं ताम्मे जिन्वतं । ऊर्जꣳ सन्धत्तं ताम्मे जिन्वतं ।
रयिꣳ सन्धत्तं ताम्मे जिन्वतं । पुष्टिꣳ सन्धत्तं ताम्मे जिन्वतं ।
प्रजाꣳ सन्धत्तं ताम्मे जिन्वतं । पशून्थ्सन्धत्तं तान्मे जिन्वतं ।
स्तुतोऽसिजनधाः । देवास्त्वा शुक्रपाः प्रणयन्तु ॥
सुवीराः प्रजाः प्रजनयन् परीहि ।

## 28.10 द्वितीयाष्टके प्रथमप्रश्नः प्रथमपञ्चातिः

अङ्गिरसो वै सत्रमासत । तेषां पृश्ञि–र्घर्मधु–गासीत् ।
सर्जीषेणा जीवत् । तेऽब्रुवन्न् । कस्मैनु–सत्रमास्महे ।
येऽस्या ओषधीर्न जनयाम इति । ते दिवो वृष्टिमसृजन्त ।
यावन्त स्स्तोका अवा पद्यन्त । तावतीरो–षधयोऽजायन्त ।
ता जाताः पितरो विषेणा लिंपन्न् ॥ [ ] तासां जग्ध्वा–रुप्यंत्यैत् ।

## 28.11 तृतीयाष्टके प्रथमप्रश्नः प्रथमपञ्चातिः

अग्निर्नः पातु कृत्तिकाः । नक्षत्रं देवमिन्द्रियम् ।
इदमासां–ँविचक्षणम् । हविरासं जुहोतन ।
यस्य भान्ति रश्मयो यस्य केतवः ।
यस्येमा विश्वा भुवनानि सर्वा । स कृत्तिका–भिरभि सँवसानः।
अग्निर्नो देवस्सुविते दधातु । प्रजापते रोहिणीवेतु पत्नी ।
विश्वरूपा बृहती चित्रभानुः ॥ [ ] सा नो यज्ञस्य सुविते दधातु ।

## 28.12 तृतीयाष्टके नवमप्रश्नः प्रथमपञ्चातिः

प्रजापति–रश्वमेध मसृजत । सोऽस्माथ्सृष्टो–ऽपाक्रामत् ।
तमष्टा दशिभिरनु प्रायुङ्क्त । तमाप्नोत् । तमाप्त्वाऽष्टा दशिभिर वारुन्ध ।
यदष्टा दशिन आलभ्यन्ते ।
यज्ञमेवतै–राप्त्वा यजमानो ऽवरुन्धे । सँवथ्सरस्य वा एषा प्रतिमा ।
यदष्टा दशिनः । द्वादश मासाः पञ्चर्तवः । सँवथ्सरो ऽष्टा दशः ॥

## 28.13 तृतीयाष्टके नवमप्रश्नः अन्त्यपञ्चातिः

यद्दर्.शपूर्ण मासौ यजते । अश्वस्यैव मेद्ध्यस्य पदे पदे जुहोति ।

एत दनुकृति हस्मवै पुरा । अश्वस्य मेद्ध्यस्य पदे पदे जुह्वति ।

योवा अश्वस्य मेद्ध्यस्य विवर्त्तनं वेँद ।

अश्वस्यैव मेद्ध्यस्य विवर्त्तने विवर्त्तने जुहोति ।

असौवा आदित्यो ऽश्वः । स आहवनीय मागच्छति ।

तद्विवर्त्तते । यदग्नि होत्रं जुहोति ।

अश्वस्यैव मेद्ध्यस्य विवर्त्तने विवर्त्तने जुहोति ।

एत दनुकृति हस्मवै पुरा ।

अश्वस्य मेद्ध्यस्य विवर्त्तने विवर्त्तने जुह्वति ॥

## 28.14 काटके प्रथमप्रश्नः प्रथमपञ्चातिः

संज्ञानं विँज्ञानं प्रज्ञानं जानदभि जानत् । संकल्पमानं प्रकल्पमान-

मुपकल्पमान-मुपक्लृप्तं क्लृप्तं । श्रेयो वसीय आयथ्स्संभूतं भूतं ।

चित्रः केतुः प्रभानाभान्-थ्संभान् ।

ज्योतिष्मा॑ स्तेजस्वाना तप॑ स्तपन्न भितपन्न् ।
रोचनो रोचमान-श्शोभन-श्शोभमानः कल्याणः ।
दर्शा दृष्टा दर्शता विश्वरूपा सुदर्शना ।
आप्यायमा-नाप्यायमा-नाप्याया सूनृतेरा ।
आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी ।
दाता प्रदाता ऽऽनन्दो मोदः प्रमोदः ॥ [ ]
आवेशय-न्निवेशयन्-थ्सँवेशन-स्स॑ शान्त श्शान्तः ।

## 28.15 काटके तृतीयप्रश्नः अन्त्यपञ्चातिः

तस्यै वात्मा पद वित्तं ँविदित्वा । न कर्मणा लिप्यते पापकेन ।
पञ्च पञ्चा शत स्त्रिवृत स्सँवथ्सराः । पञ्च पञ्चा शतः पञ्चदशाः ।
पञ्च पञ्चा शत स्सप्तदशाः । पञ्च पञ्चा शत एकवि॑शाः ।
विश्व सृजा॑ सहस्र सँवथ्सरं ।
एते नवै विश्व सृज इदं ँविश्वमसृजन्त । यद्विश्व मसृजन्त ।
तस्माद्विश्व सृजः । विश्वमेना ननु प्रजायते ।

ब्रह्मण–स्सायुज्य७ं सलोकतां ँयन्ति ।

एता सामेव देवताना७ं सायुज्यं । सार्ष्टिता७ं समान लोकतां ँयन्ति ।

य एत दुपयन्ति । ये चैनत् प्राहुः । येभ्यश्चैनत् प्राहुः । ॐ ॥

## 28.16 आरण्यके प्रथमप्रश्नः प्रथमपञ्चातिः

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवा७ं सस्तनूभिः । व्यशेम देवहितं ँयदायुः ।

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।

आपमापा–मपस्स्सर्वाः । अस्मा–दस्मा–दितोस्मुतः ॥ [ ]

अग्नि–र्वायुश्च सूर्यश्च ।

## 28.17 आरण्यके दशमप्रश्नः अन्त्यपञ्चातिः

तस्यैवं विँदुषो यज्ञस्यात्मा यजमान–श्श्रध्दा पत्नी शरीर–मिध्ममुरो

वेदिर्–लोमानि बर्.हिर् वेद–श्शिखा हृदयं ँयूपः काम आज्यं मन्युः

पशुस्तपो ऽग्निर्–दम–श्शमयिता दक्षिणा–वाग्धोता प्राण उद्गाता ,

चक्षुरध्वर्युर्–मनो ब्रह्मा श्रोत्रमग्नी–ध्यावध्द्रियते सा दीक्षा यदश्नाति
तध्दविर्–यत्पिबति तदस्य सोमपानं यँद्रमते तदुपसदो यथ्संच–रत्युप
विश–त्युत्तिष्ठते च सप्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृति–राहुतिर्–
यदस्य ,

विज्ञानं तज्जुहोति यथ्सायं प्रातरत्ति तथ्समिधं यँत्प्रातर् मध्यन्दिनꣳ
सायञ्च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च
मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवँथ्सराश्च
परिवथ्सराश्च ते ऽहर्गणा–स्सर्व वेदसं वँा,

एतथ्सत्रं यँन्मरणं तदवभृथ एतद्वै जरामर्य–मग्निहोत्रꣳ सत्रं
यँ य एवं विँद्वा–नुदगयने प्रमीयते देवानामेव महिमानं गत्वा ऽऽदित्यस्य
सायुज्यं,

गच्छत्यथ यो दक्षिणे प्रमीयते पितृणा–मेव महिमानं गत्वा चन्द्रमस
स्सायुज्य९ं सलोकता–माप्नोत्येतौ वै सूर्याचन्द्रमसौर्–महिमानौ ब्राह्मणो
विद्वानभि जयति तस्माद्ब्रह्मणो महिमान माप्नोति तस्माद्ब्रह्मणो महिमान–
मित्युपनिषद् ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

---

# 29 ऋचां प्राची

ऋचां प्राची महती दिगुच्यते । दक्षिणा–माहु र्यजुषा–मपारां ।
अथर्वणा–मङ्गिरसां प्रतीची । साम्ना–मुदीची महती दिगुच्यते ।
ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मद्ध्ये अह्नः ।
सामवेदे–नास्तमये महीयते । वेदै–रशून्य–स्त्रिभिरेति सूर्यः ।
ऋग्भ्यो जाता९ं सर्वशो मूर्त्ति–माहुः । सर्वा गति र्याजुषी हैव शश्वत् ॥
सर्वं तेज स्सामरूप्य९ं ह शश्वत् । सर्व९ं हेदं ब्रह्मणा हैव सृष्टं ॥ 1

ऋग्भ्यो जातं वैश्यं वर्ण-माहुः । यजुर्वेदं क्षत्रियस्या-हु योनिं ।
सामवेदो ब्राह्मणानां प्रसूतिः । पूर्वे पूर्वेभ्यो वच एत-दूचुः ।
आदर्श-मग्निं चिन्वानाः । पूर्वे विश्व सृजोऽमृताः ।
शतं वर्ष सहस्राणि । दीक्षिता स्सत्र-मासत ॥
तप आसीद् गृहपतिः । ब्रह्म ब्रह्मा भवथ् स्वयं ।
सत्य७्ह हो तैषा-मासीत् । यद् विश्वसृज आसत ॥ 2
अमृत-मेभ्य उदगायत् । सहस्रं परिवथ्सरान् ।
भूत७्ह प्रस्तो-तैषा-मासीत् । भविष्यत् प्रति चाहरत् ।
प्राणो अद्ध्वर्यु-रभवत् । इद७् सर्व७् सिषासतां ॥ 3

अपानो विद्वा-नावृतः । प्रति प्रातिष्ठ-दद्ध्वरे ।
आर्त्तवा उपगातारः । सदस्या ऋतवो-ऽभवन्न् ।
अर्द्धमासाश्च मासाश्च । चमसा-द्ध्व-र्यवोऽभवन्न् ।
अश७् सद् ब्रह्मण-स्तेजः । अच्छा वाकोऽभवद्-यशः ।
ऋत-मेषां प्रशास्ता-ऽसीत् । यद् विश्व सृज आसत ॥ 4

ऊर्ग्–राजान–मुदवहत् । ध्रुव गोप स्सहो–ऽभवत् ।
ओजोऽभ्यष्टौद् ग्राव्णः । यद् विश्व सृज आसत ।
अपचितिः पोत्रीया–मयजत् । नेष्ट्रीया–मयजत् त्विषिः ।
आग्नीद्ध्राद् विदुषी सत्यं । श्रद्धा हैवा यजथ् स्वयं ।
इरा पत्नी विश्व सृजां । आकूति–रपिनड्ढविः ॥
इद्ध्मꣳ ह क्षुच् चै–भ्य उग्रे । तृष्णा चा वहतामुभे ।
वागेषाꣳ सुब्रह्मण्या–सीत् । छन्दो योगान् विजानती ।
कल्पतन्त्राणि तन्वाना हः । सꣳ स्थाश्च सर्वशः ॥ 5

अहोरात्रे पशु पाल्यौ । मुहूर्त्ताः प्रेष्या अभवन् ।
मृत्युस् तद–भव–द्धाता । शमितो–ग्रो विशां पतिः ॥
विश्वसृजः प्रथमा स्सत्र–मासत । सहस्र समं प्रसुतेन यन्तः ।
ततो ह जज्ञे भुवनस्य गोपाः । हिरण्मय श्शकुनि ब्रह्म नाम ।
येन सूर्य–स्तपति तेजसेद्धः । पिता पुत्रेण पितृमान् योनियोनौ ।
नावेदविन् मनुते तं बृहन्तं । सर्वानुभु–मात्मानꣳ संपराये ॥ 6

एष नित्यो महिमा ब्राह्मणस्य । न कर्मणा वर्द्धते नो कनीयान् ॥
तस्यैवा–त्मा पदवित्तं ँविदित्वा । न कर्मणा लिप्यते पापकेन ।
पञ्च पञ्चाशत–स्त्रिवृत स्संवथ्सराः । पञ्च पञ्चाशतः पञ्चदशाः ।

पञ्च पञ्चाशत स्सप्तदशाः । पञ्च पञ्चाशत एकवि७्शाः ।
विश्वसृजा७् सहस्र संवथ्सरं । एतेन वै विश्वसृज इदं ँविश्व–मसृजन्त ।
यद् विश्व–मसृजन्त । तस्माद् विश्वसृजः **|| 7**

विश्व–मेना–ननु प्रजायते । ब्रह्मण स्सायुज्य७् सलोकतां ँयन्ति ।
एतासामेव देवताना७् सायुज्यं । सार्ष्टिता७् समान लोकतां ँयन्ति ।
य एत–दुपयन्ति । ये चैनत् प्राहुः । येभ्य–श्चैनत् प्राहुः ॥ ओं **|| 8**

(ओं शान्तिः शान्तिः शान्तिः ॥)

---

# 30 प्रदक्षिण मन्त्राः

**(Order of chanting various mantras may vary )**

ये अर्वाङुतवा पुराणे वेदं ँविद्वा७ं समभितो वदन्त्यादित्य मेवते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च ह७ं समिति यावतीर्वै देवतास्ता स्सर्वा वेद विदि ब्राह्मणे वसन्ति तस्मात् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्ना श्लीलङ्कीर्तये देता एव देवताः प्रीणाति ॥ 1

नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवद्भ्यो नम आशिनेभ्याः ।
यजाम देवान् यदीशक्नवा ममा ज्यायसः शं समावृक्षि देवाः ॥ 2

सदसस्पति मद्भुतं प्रिय–मिन्द्रस्य काम्यं । सनिं मेधामयासिषं ॥ 3

सप्रथ सभां मे गोपाय । ये च सभ्या स्सभासदः ।
तानिन्द्रियावतः कुरु । सर्वमायु–रुपासताम् ।

अहे बुध्निय मन्त्रं मे गोपाय । यमृषय–स्त्रै–विदा विदुः ।

ऋच स्सामानि यजूꣳषि । सा हि श्रीरमृता सताम् ॥ 4

पर्वत इवा विशाचलिः । इन्द्र इवेह ध्रुवस्तिष्ठ । इह राष्ट्र मुधारय ।

अभितिष्ठन् पृतन्यतः । अधरेसन्तु शत्रवः । इन्द्र इव वृत्रहातिष्ठ ॥ 5

((सुमुहूर्तोऽस्तु । सुप्रतिष्ठितमस्तु ॥))

ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।

ध्रुवं त इन्द्र–श्चाग्निश्च राष्ट्रं धारयतां ध्रुवं ॥ 6

देवीं ँवाचम जनयन्त देवाः । तां ँविश्वरूपाः पशवो वदन्ति ।

सानो मन्त्रेष मूर्जं दुहाना । धेनुर्वागस्मा–नुपसुष्टुतैतु ॥ 7

Vachanam - सुमुहूर्तो ऽस्त्वित्यनु गृह्णन्तु ।

Prati-Vachanam - सुमुहूर्तोऽस्तु । सुप्रतिष्ठितमस्तु ॥

***(Rig Vedic Convention of chanting)**

*अग्निस्तु विश्रवस्तमं तुवि ब्रह्माणमुत्तमं ।

अतूर्तं श्रावयत् पतिं पुत्रं ददाति दाशुषे ॥ 8

*अग्नि–र्ददाति सत्पतिं सा सा हयो युधा नृभीः ।

अग्निरत्यं रघुष्यदं जेतार–मपराजितं ॥ 9

नमः सभाभ्य सभापतिभ्यश्च वो नमः ॥ 10

---

# 31 प्रोक्षण मन्त्राः

देवस्यत्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां । पूष्णो हस्ताभ्यां ।

अश्विनो–र्भैषज्येन । तेजसेऽ ब्रह्मवर्चसाया भिषिंचामि ॥ 1

देवस्यत्वा सवितुः प्रसवे । अश्विनो बाहुभ्यां ।

पूष्णो हस्ताभ्यां । सरस्वत्यै भैषज्येन ।

वीर्याया–न्नाद्याया भिषिंचामि ॥ 2

देवस्यत्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्यां । पूष्णो हस्ताभ्यां ।
इन्द्रस्ये-न्द्रियेण । श्रियै यशसे बलाया भिषिंचामि ।
सोमꣳ राजानं वरुण-मग्नि मन्वारभामहे ।
आदित्यान् विष्णुꣳ सूर्यं ब्रह्माणञ्च बृहस्पतिं ॥ 3

देवस्यत्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो
यन्तु-र्यन्त्रेणा-ग्नेस्त्वा साम्राज्येना भिषिंचा-मीन्द्रस्यत्वा साम्राज्येना
भिषिंचामि बृहस्पतेस्त्वा साम्राज्येना भिषिंचामि ॥ 4

आयुरा-शास्ते । सुप्रजास्त्वमा-शास्ते । सजातवनस्यामा-शास्ते ।
उत्तरान्देव-यज्यामा-शास्ते । भूयो हविष्करणमा-शास्ते ।
दिव्यन्धामा-शास्ते । विश्वं प्रियमा-शास्ते । यदनेन हविषा-शास्ते ॥ 5

तदश्या-त्तदृध्यात् । तदस्मै देवारासन्तां ॥
तदग्नि-र्देवो देवेभ्यो वनते । वयमग्नेर्मानुषाः ।

इष्टं च वीतं च । उभेचनो द्यावा पृथिवी अ॒ हसस्पातां ।
इह गति–र्वामस्येदं च । नमो देवेभ्यः ॥ 6

द्रुपदादिवेन् मुमुचानः । स्विन्न–स्स्नात्वी मलादिव ।
पूतं पवित्रेणे वाज्यं । आपः शुन्धन्तु मैनसः ॥
भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः ॥ 7

प्राशन मन्त्रः

आप इद्वा उभेषजीः । आपो अमीव चातनीः ।
आपस्सर्वस्य भेषजी । तास्ते कृण्वन्तु भेषजं ॥
अकाल मृत्यु हरणम् सर्व व्याधि निवारणं ।
सर्व(समस्त) पापक्षयहरं (देवता नाम*) वरुण* पाथोदकं शुभं ।

स्त्रीणां प्राशने:

आमयावी चिन्वीत । आपो वै भेषजं । भेषजमेवास्मै करोति ।
सर्वमायुरेति ॥ 8

# 32 ओषधि सूक्तं

या जाता ओषधयो देवेभ्य स्त्रियुगं पुरा ।
मन्दामि बभ्रूणा मह७ शतं धामानि सप्त च ।
शतं वो अंब धामानि सहस्रमुतवो रुहः ।
अथा शतक्रत्वो यूयमिमं मे अगदं कृत ।
पुष्पावतीः प्रसूवतीः फलिनीर फला उत ।
अश्वा इव सजित्वरीर्–वीरुधः पारयिष्णवः ।
ओषधीरिति मातर–स्तद्वो देवी–रुपब्रुवे ।
रपा७्सि विघ्न–तीरितर पश्चातयमानाः ॥ **1**

अश्वत्थेवो निषदनं पर्णेवो वसतिः कृता ।
गोभाज इत्किला सथयथ् सनवथ पूरुषं ।
यदहं वाजय–न्निमा ओषधी–र्हस्त आदधे ।

आत्मा यक्ष्मस्य नश्यति पुरा जीव गृभो यथा ।
यदोषधय स्संगच्छन्ते राजान–स्समिता विव ।
विप्रस्स–उच्यते भिषग्रक्षो–हाऽमीव चातनः ।
निष्कृति र्नामवो माताऽथा यूय७स्थ संकृतीः ।
सराः पतत्रिणी स्स्थनयदा मयति निष्कृत ॥ 2

अन्यावो अन्यामव–त्वन्याऽन्यस्या उपावत ।
तास्सर्वा ओषधय–स्सँविदाना इदं मे प्रावता वचः ।
उच्छुष्मा ओषधीनां गावो गोष्ठा दिवेरते ।
धन७ सनिष्यन्ती नामात्मा–नन्दव पूरुष ।
अति विश्वाः परिष्ठास्ते न इव व्रजमक्रमुः ।
ओषधयः प्राचुच्यवु र्यत्किञ्च तनुवा७ रपः ।
यास्त आतस्थु–रात्मानं याँ आवि विशुः परुः परुः ।
तास्ते यक्ष्मं विबाधन्ता मुग्रो मद्ध्य मशीरिव ॥ 3

साकं ँयक्ष्म प्रपतश्येनेन किकि दीविना ।
साकं ँवातस्य–द्ध्राज्या साकन्नश्य निहाकया ।
अश्वावती९ सोमवती मूर्जयन्ती मुदोजसं ।
आविथ्सि सर्वा ओषधीरस्मा अरिष्ट तातये ।
याः फलिनी र्या अफला अपुष्पायाश्च पुष्पिणीः ।
बृहस्पति प्रसूता स्तानो मुञ्चन्त्व९ हसः ।
या ओषधय स्सोमराज्ञीः प्रविष्टाः पृथिवी मनु ॥ 4

तासां त्वमस्युत्तमा प्रणो जीवात–वेसुव ।
अवपतन्ती–रवदन्दिव ओषदयः परि ।
यं जीव मश्ञवा महै न सरिष्याति पूरुषः ।
याश्चेद मुप–श्रृण्वन्ति याश्च दूरं परागताः ।
इह संगत्यता स्सर्वा अस्मै सन्दत्त भेषजं ।
मावो रिषत् खनिता यस्मै चाहं खनामिवः ।
द्विप–च्चतुष्पद–स्माक९ सर्व–मस्त्व नातुरं ।

ओषधय स्सँवदन्तो सोमेन सह राज्ञा ।
यस्मै करोति ब्राह्मणस्त९ राजन् पारयामसि ॥ 5
ओं शान्तिः शान्तिः शान्तिः ॥

---

## 33 मन्त्र पुष्पं

ॐ । योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति ।
चन्द्रमा वा अपां पुष्पम् । पुष्पवान् प्रजावान् पशुमान् भवति ।
य एवं वेद ॥ 1

योऽपामायतनं वेद । आयतनवान् भवति । अग्निर्वा अपामायतनं ।
आयतनवान् भवति । योऽग्नेरायतनं वेद । आयतनवान् भवति ।
आपो वा अग्नेरायातनं । आयतनवान् भवति । य एवं वेद ॥ 2

योऽपामायतनं वेद । आयतनवान् भवति । वायुर्वा अपामायतनं ।
आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ।

आपो वै वायोरायातनं । आयतनवान् भवति । य एवं वेद ॥ 3

योऽपामायतनं वेद । आयतनवान् भवति । असौ वै तपन्नपा-मायतनं ।
आयतनवान् भवति । योऽमुष्य-तपत आयतनं वेद ।
आयतनवान् भवति । आपोवा अमुष्य-तपत आयतनं ।
आयतनवान् भवति । य एवं वेद ॥ 4

योऽपामायतनं वेद । आयतनवान् भवति । चन्द्रमा वा अपामायतनं ।
आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान् भवति ।
आपो वै चन्द्रमस आयतनं । आयतनवान् भवति । य एवं वेद ॥ 5

योऽपामायतनं वेद । आयतनवान् भवति । नक्षत्राणि वा अपामायतनं ।
आयतनवान् भवति । यो नक्षत्राणा-मायतनं वेद । आयतनवान् भवति ।
आपो वै नक्षत्राणा-मायतनं । आयतनवान् भवति । य एवं वेद ॥ 6

योऽपामायतनं वेद । आयतनवान् भवति । पर्जन्यो वा अपामायतनं ।
आयतनवान् भवति । यः पर्जन्य-स्यायतनं वेद । आयतनवान् भवति ।

आपो वै पर्जन्य–स्यायतनं । आयतनवान् भवति । य एवं वेँद ॥ 7
योऽपामायतनं वेँद । आयतनवान् भवति । सँवथ्सरो वा अपामायतनं ।
आयतनवान् भवति । यस्सँवथ्सर–स्यायतनं वेँद । आयतनवान् भवति ।
आपो वै सँवथ्सर–स्यायतनं । आयतनवान् भवति । य एवं वेँद ॥ 8
योऽफ्सुनावं प्रतिष्ठितां वेँद । प्रत्येवतिष्ठति ॥ 9

---

राजाधिराजाय प्रसह्य साहिने । नमो वयं वैँश्रवणाय कुर्महे ।
स मे कामान् कामकामाय मह्यं । कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय । महाराजाय नमः ॥

---

ओंतद्ब्रह्म । ओंतद्वायुः। ओंतदात्मा । ओंतथ्सत्यं ।
ओंतथ्सर्वं । ओंतत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां वि॑श्वमूर्तिषु ।
त्वम्–यँज्ञस्त्वं–वँषट्कारस्त्व–मिन्द्रस्त्वँ–रुद्रस्त्वं–
विँष्णुस्त्वं–ब्रह्मत्वं प्रजापतिः ।
त्वन्तदाप आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

---

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व–मानशुः ।
परेण नाकं निहितं गुहायां विभ्राजदेत–द्यतयो विशन्ति ॥

वेदान्तविज्ञान सुनिश्चितार्था–स्सन्यास योगाद्यत–यश्शुद्ध सत्वाः ।
ते ब्रह्मलोके तु परान्तकाले परामृतात् परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्य स७स्थं ।
तत्रापि दह्रं गगनं विशोक–स्तस्मिन् यदन्तस्त–दुपासितव्यं ॥

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृति–लीनस्य यः परस्स महेश्वरः ॥

यो वै तां ब्रह्मणो वेद । अमृतेनावृतां पुरीम् ।
तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः ॥

---

# 34 अघमर्षण सूक्तं

हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।

यन्मया भुक्त–मसाधूनां पापेभ्यश्च प्रतिग्रहः ।

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं ।

तन्न इन्द्रो वरुणो बृहस्पति–स्सविता च पुनन्तु पुनः पुनः ।

नमोऽग्नये ऽप्सुमते नम इन्द्राय नमो वरुणाय नमो

वारुण्यै नमोऽद्भ्यः ॥ **1**

यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् ।

अत्याशनादती–पानाद्यच्च उग्रात् प्रतिग्रहात् ।

तन्नो वरुणो राजा पाणिना–ह्यवमर्शतु ।

सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः ।

नाकस्य पृष्ठ मारुह्य गच्छेद् ब्रह्मस लोकतां ।

यश्चाप्सु वरुणस्स पुनात्वघमर्षणः ।

इमं मे गंगे यमुने सरस्वति शुतुद्रि स्तोम॑ सचता परुष्णिया ।

असिक्निया मरुद्वृधे वितस्तया ऽऽर्जीकीये शृणुह्या सुषोमया ।

ऋतं च सत्यं चाभीद्ध्दा–त्तपसो–ऽध्यजायत ।

ततो रात्रि रजायत तत–स्समुद्रो अर्णवः ॥ 2

समुद्रा दर्णवा–दधि संवँथ्सरो अजायत ।

अहोरात्राणि विदध–द्विश्वस्य मिषतो वशी ।

सूर्या चन्द्रमसौ धाता यथापूर्व–मकल्पयत् ।

दिवं च पृथिवीं चान्तरिक्ष–मथो सुवः ।

यत्पृथिव्या॑ रजस्स्व मान्तरिक्षे विरोदसी ।

इमा॑ स्तदापो वरुणः पुनात्वघमर्षणः ।

पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः ।

एष भूतस्य मध्ये भुवनस्य गोप्ता ।

एष पुण्यकृतां ँल्लोकानेष मृत्यो हिरण्मयम् ।
द्यावा पृथिव्यो हिरण्मय७ँ स७ँ श्रित७ँ सुवः ॥ 3

सन–स्सुव–स्स७ँ शिशाधि । आर्द्रं ज्वलति ज्योति–रहमस्मि ।
ज्योति र्ज्वलति ब्रह्माह–मस्मि । योऽह–मस्मि ब्रह्माह–मस्मि ।
अहमस्मि ब्रह्माह–मस्मि । अहमेवाहं मां जुहोमि स्वाहा ।
अकार्य–कार्यव–कीर्णी स्तेनो भ्रूणहा गुरुतल्पगः ।
वरुणोऽपा–मघमर्षण–स्तस्मात् पापात्प्रमुच्यते ।
रजोभूमि–स्त्वमा७ँ रोदयस्व प्रवदन्ति धीराः ।
आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन् प्रजा भुवनस्य राजा ।
वृषा पवित्रे अधिसानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः ॥ 4

# 35 त्रिसुपर्ण मन्त्राः

ब्रह्म मेतु मां । मधु मेतु मां । ब्रह्म मेव मधु मेतु मां ।
यास्ते सोम प्रजावथ्सोऽभिसो अहं । दुष्वप्न–हन्दुरुष्षह ।
यास्ते सोम प्राणा७ स्ताञ्जुहोमि । त्रिसुपर्ण मयाचितं ब्राह्मणाय दद्यात् ।
ब्रह्महत्यां ँवा एते घ्नन्ति । ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति ।
ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति । ओं ॥ 1

ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधु मेधया ।
अद्या नो देव सवितः प्रजावथ्सावी–स्सौभगं ।
परा दुष्वप्नियऽ सुव । विश्वानि देव सवित–र्दुरितानि परासुव ।
यद्भद्रं तन्म आसुव । मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ।
माद्ध्वी–र्नस्सन्त्वोषधीः । मधुनक्त मुतोषसि मधुमत्पार्थिवऽ रजः ।
मधुद्यौरस्तु नः पिता । मधुमान्नो वनस्पति–र्मधुमाऽ अस्तु सूर्यः ।

माध्वीर्गावो भवन्तु नः । य इमं त्रिसुपर्ण–मयाचितं ब्राह्मणाय दद्यात् ।

भ्रूणहत्यां ँवा एते घ्नन्ति । ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति ।

ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति । ओं ॥ **2**

ब्रह्म मेधवा । मधु मेधवा । ब्रह्म मेव मधु मेधवा ।

ब्रह्मा देवानां पदवीः कवीना–मृषि–र्विप्राणां महिषो मृगाणां ।

श्येनो गृद्ध्राणा॰ स्वधिति–र्वनाना॰ सोमः पवित्र–मत्येति रेभन्न् ।

ह॰स–श्शुचिष–द्वसुरन्तरिक्ष–सद्धोता– वेदिष–दतिथि–र्दुरोणसत् ।

नृषद्वर–सदृत–सद्व्योम–सदब्जा– गोजा ऋतजा

अद्रिजा ऋतं बृहत् । **3**

ऋचेत्वा रुचेत्वा समि–थ्स्रवन्ति सरितो न धेनाः ।

अन्त र्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि ।

हिरण्ययो वेतसो मध्य आसाम् ।

तस्मिन्थ्सुपर्णो मधुकृत् कुलायी भजन्नास्ते मधु देवताभ्यः ।

तस्यासते हरय–स्सप्ततीरे स्वधां दुहाना अमृतस्य धारां ।

य इदं त्रिसुपर्ण–मयाचितं ब्राह्मणाय दद्यात् ।

वीरहत्यां ँवा एते घ्नन्ति । ये ब्राह्मणा–स्त्रिसुपर्णं पठन्ति ।

ते सोमं प्राप्नुवन्ति । आसहस्रात् पङ्क्तिं पुनन्ति । ओं ॥ **4**

---

# 36 जयादि होमः

एतत् कर्म समृद्ध्यर्थं जयादि होमं करिष्ये ।

चित्तञ्च स्वाहा – चित्ताय इदं न मम ॥ 1

चित्तिश्च स्वाहा – चित्त्या इदं न मम ॥ 2

आकूतञ्च स्वाहा – आकूताय इदं न मम ॥ 3

आकूतिश्च स्वाहा – आकूत्या इदं न मम ॥ 4

विज्ञातञ्च स्वाहा – विज्ञाताय इदं न मम ॥ 5

विज्ञानश्च स्वाहा – विज्ञानाय इदं न मम ॥ 6

मनश्च स्वाहा – मनस इदं न मम ॥ 7

शक्वरीश्च स्वाहा – शक्वरीभ्य इदं न मम ॥ 8

दर्शश्च स्वाहा – दर्शाय इदं न मम ॥ 9

पूर्णमासश्च स्वाहा – पूर्णमासाय इदं न मम ॥ 10

बृहच्च स्वाहा – बृहत इदं न मम ॥ 11

रथन्तरश्च स्वाहा – रथन्तराय इदं न मम ॥ 12

प्रजापति–र्जयानिन्द्राय वृष्णे प्रायच्छ–दुग्रः पृतना–ज्येष्ठ तस्मै
विश्व स्समनमन्त सर्वास्स उग्र स्सहि हव्यो बभूव स्वाहा ।
प्रजापतय इदं न मम ॥ 13

अग्नि र्भूताना–मधिपति –स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
अग्नय इदं न मम ॥ 14

इन्द्रो ज्येष्ठाना–मधिपति–स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
इन्द्राय इदं न मम ॥ 15

यमः पृथिव्योऽधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या– माशिष्यस्यां
पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
यमाय इदं न मम ॥ 16

वायु–रन्तरिक्षस्या–धिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
वायव इदं न मम ॥ 17

सूर्यो दिवोऽधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या– माशिष्यस्यां
पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
सूर्याय इदं न मम ॥ 18

चन्द्रमा नक्षत्राणा–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
चन्द्रमस इदं न मम ॥ 19

बृहस्पति–र्ब्रह्मणोऽधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॰ स्वाहा ।
बृहस्पतय इदं न मम ॥ 20

मित्र–स्सत्याना–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या᳚ स्वाहा ।
मित्राय इदं न मम ॥ 21

वरुणोऽपामधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या᳚ स्वाहा ।
वरुणाय इदं न मम ॥ 22

समुद्रः स्रोत्या–नामधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या᳚ स्वाहा ।
समुद्राय इदं न मम ॥ 23

अन्न᳚ साम्राज्याना–मधिपति–तन्मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या᳚ स्वाहा ।
अन्नाय इदं न मम ॥ 24

सोम ओषधीना–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
सोमाय इदं न मम ॥ 25

सविता प्रसवाना–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
सवित्र इदं न मम ॥ 26

रुद्रः पशुनामधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या– माशिष्यस्यां
पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
रुद्राय इदं न मम ॥ 27

(अप उपस्पृश्य –This is not a Mantra, but an instruction to cleanse your hand with water)

त्वष्टा रूपाणा–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
त्वष्ट्र इदं न मम ॥ 28

विष्णुः पर्वताना–मधिपति स्समावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
विष्णाव इदं न मम ॥ 29

मरुतो गणाना–मधिपतयस्ते–माऽवन्त्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्या–
माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां देवहूत्या॑ स्वाहा ।
मरुद्भ्य इदं न मम ॥ 30

पितरः पितामहाः परेऽवरे तातास्तता महा इहमाऽवतस्मिन् ब्रह्मन्नस्मिन्
क्षत्रेऽस्या– माशिष्यस्यां पुरोधाया–मस्मिन् कर्मन्नस्यां
देवहूत्या॑ स्वाहा । पितृभ्य इदं न मम ॥ 31

मन्त्रोक्त देवताभ्य इदं न मम

(अप उपस्पृश्य –This is not a Mantra, but an instruction to cleanse your hand with water)

ऋताषाड् ऋतधामाऽग्नि-र्गन्धर्व-स्तस्यौषधयो-ऽप्सरस ऊर्जो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्मक्षत्रं पान्तु तस्मै स्वाहा ।
अग्नये गन्धर्वाय इदं न मम ॥ 32

ताभ्यः स्वाहा । ओषधीभ्यो-ऽप्सरोभ्य इदं न मम ॥ 33

सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीचयो ऽप्सरस आयुवो
नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।
सूर्याय गन्धर्वाय इदं न मम ॥ 34

ताभ्यः स्वाहा । मरीचिभ्यो ऽप्सरोभ्य इदं न मम ॥ 35

सुषुम्न स्सूर्यरश्मि-श्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्य-प्सरसो बेकुरयो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।
चन्द्रमसे गन्धर्वाय इदं न मम ॥ 36

ताभ्यः स्वाहा । नक्षत्रेभ्यो-ऽप्सरोभ्य इदं न मम ॥ 37

भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अफ्सरस–स्स्तवा नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।
यज्ञाय गन्धर्वाय इदं न मम ॥ 38
ताभ्यः स्वाहा । दक्षिणाभ्यो ऽफ्सरोभ्य इदं न मम ॥ 39

प्रजापति–र्विश्वकर्मा मनो गन्धर्वस्तस्य– र्ख् सामान्य–फ्सरसो
वह्नयो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु
तस्मै स्वाहा । मनसे गन्धर्वाय इदं न मम ॥ 40
ताभ्यः स्वाहा । ऋख् सामेभ्यो–ऽफ्सरोभ्य इदं न मम ॥ 41
इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापो–ऽफ्सरसो मुदा नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।
वाताय गन्धर्वाय इदं न मम ॥ 42
ताभ्यः स्वाहा । अद्भ्योऽफ्सरोभ्य इदं न मम ॥ 43

भुवनस्य पते यस्यत उपरि गृहा इह च ।
सनो – रास्वाज्यानिं रायस्पोषं सुवीर्यं संवँथ्सरीणां
स्वस्तिं स्वाहा । भुवनस्य पत्ये इदं न मम ॥ 44

परमेष्ठ्यधिपति–र्मृत्युर्–गन्धर्वस्तस्य विश्वमफ्सरसो भुवो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।
मृत्यवे गन्धर्वाय इदं न मम ॥ 45
ताभ्यः स्वाहा । विश्वस्मा ऽफ्सरोभ्य इदं न मम ॥ 46
सुक्षिति–स्सुभूति–र्भद्रकृथ् सुवर्वान् पर्जन्यो गन्धर्वस्तस्य विद्युतो
ऽफ्सरसो रुचो नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं
पान्तु तस्मै स्वाहा । पर्जन्याय गन्धर्वाय इदं न मम ॥ 47
ताभ्यः स्वाहा । विद्युद्भ्यो–ऽफ्सरोभ्य इदं न मम ॥ 48

दूरे हेतिरमृडयो मृत्यु गन्धर्वस्तस्य प्रजा अफ्सरसो भीरुवो नाम
स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै स्वाहा ।

मृत्यवे गन्धर्वाय इदं न मम ॥ 49

ताभ्यः स्वाहा । प्रजाभ्यो–ऽप्सरोभ्य इदं न मम ॥ 50

चारुः कृपण काशी कामो गन्धर्वस्त–स्याधयो–ऽप्सरस–
श्शोचयन्ती र्नाम स इदं ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं
पान्तु तस्मै स्वाहा । कामाय गन्धर्वाय इदं न मम ॥ 51

ताभ्यः स्वाहा । आधिभ्यो–ऽप्सरोभ्य इदं न मम ॥ 52

सनो भुवनस्य पते यस्यत उपरि गृहा इह च ।
उरु ब्रह्मणेस्मै क्षत्राय महि शर्म यच्छ स्वाहा ।
भुवनस्यपत्ये ब्रह्मण इदं न मम ॥ 53

(Recite in mind)

प्रजापते नत्वदेता–न्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमास्तन्नो अस्तु वय७ स्याम पतयो रयीणा७ स्वाहा ।
प्रजापतय इदं न मम ॥ (mind recital ends) 54

भू स्स्वाहा – अग्नय इदं न मम ॥ 55

भुव स्स्वाहा – वायव इदं न मम ॥ 56

सुव स्स्वाहा – सूर्याय इदं न मम ॥ 57

यदस्य कर्मणो ऽत्यरीरिचं यद्वा–न्न्यून– मिहाकरं ।

अग्निष्टत् स्विष्टकृतत् विद्वान् स्सर्व७ स्विष्ट७ सुहुतं करोतु स्वाहा ।

अग्नये स्विष्टकृत इदं न मम ॥ 58

Instructions, not Mantra - (परिध्यञ्जनं न लेपकार्यं परिधि प्रहरः इतरौ प्रहरन्–आघार समिधौ प्रहृत्यस७ स्रावं जुहोति ।)

स्वाहा । वसुभ्यो रुद्रेभ्यः आदित्येभ्यः स७ स्राव भागेभ्यः

इदं न मम ॥ 59

अस्मिन् .......... होम कर्मणि मद्ध्ये संभावित मन्त्रलोभादि

सकल दोषस्य प्रायश्चित्तार्थं सर्वप्रायश्चित्तं होष्यामि ।

ओं भूर्भुवस्सुव स्स्वाहा – प्रजापतय इदं न मम ॥ 60

ज्ञाता–ज्ञात दोष निर्हरणार्थं अनाज्ञात त्रय होमं करिष्ये ।

अनाज्ञातं यँदाज्ञातं । यज्ञस्य क्रियते मिथु ।

अग्ने तदस्य कल्पय । त्वꣳहि वेत्थे यथा तथꣳ स्वाहा ।

अग्नय इदं न मम || 1

पुरुष सम्मितो यज्ञः । यज्ञः पुरुषसम्मितः ।

अग्ने तदस्य कल्पय । त्वꣳहि वेत्थे यथा तथꣳ स्वाहा ।

अग्नय इदं न मम || 2

यत्पाकत्रा मनसा दीन दक्षान । यज्ञस्य मन्वते मर्त्तासः ।

अग्निष्टद्धोता क्रतु विद्विजानन् । यजिष्टो देवाꣳ ऋतुशो यजाति स्वाहा ।

अग्नय इदं न मम || 3

भू स्स्वाहा – अग्नय इदं न मम || 4

भुव स्स्वाहा – वायव इदं न मम || 5

सुव स्स्वाहा – सूर्याय इदं न मम || 6

ओं भूर्भुवस्सुव स्स्वाहा – प्रजापतय इदं न मम || 7

श्री विष्णवे स्वाहा – श्री विष्णवे परमात्मन इदं न मम || 8

नमो रुद्राय पशुपतये स्वाहा – रुद्राय पशुपतय इदं न मम || 9

(अप उपस्पृश्य – This is not a Mantra, but an instruction to cleanse your hand with water)

## 36.1 वसोर्धारा मन्त्र पाठः

**T.S. 5-4-8-1**

वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एनमेषा धाराऽमुष्मिँ लोके पिन्वमानोप तिष्ठत आज्येन जुहोति तेजो वा, आज्यं तेजो वसोर्धारा तेजसैवास्मै तेजोऽव रुन्धेऽथो कामा वै वसोर्धारा कामानेवाऽव रुन्धे यं कामयेत प्राणानस्यान्नाद्यं वि,

**T.S. 5-4-8-2**

छिन्द्यामिति विग्राहं तस्य जुहुयात् प्राणानेवास्याऽन्नाद्यं विछिनत्ति यं कामयेत प्राणानस्याऽन्नाद्य॒ँ सं तनुयामिति सं ततां तस्य जुहुयात् प्राणानेवास्यान्नाद्य॒ँ सं तनोति द्वादश द्वादशानि, जुहोति द्वादश मासा

स्संवथ्सर स्संवथ्सरेणै वाऽस्मा अन्नमव रुन्धे, ऽन्नं च मेऽक्षुच्च म इत्याहै तद् वा

## T.S. 5-4-8-3

अन्नस्य रूपं७् रूपेणैवान्नऽमव रुन्धे, ऽग्निश्च म आपश्च म इत्याहैषा वा अन्नस्य योनिस्स योन्येवान्नमऽव रुन्धे,–र्धेन्द्राणि जुहोति देवता एवाऽव रुन्धे  यथ् सर्वेषा–मर्धमिन्द्रः प्रति तस्मादिन्द्रो, देवतानां भूयिष्ठभाक्तम इन्द्रमुत्तरमाहे–न्द्रियमेवाऽस्मि–न्नुपरिष्टाद्दधाति, यज्ञायुधानि जुहोति यज्ञो

## T.S. 5-4-8-4

वै यज्ञायुधानि यज्ञमेवाऽव रुन्धेऽथो एतद्वै यज्ञस्य रूप७ रूपेणैव यज्ञमव रुन्धे,ऽवभृथश्च मे स्वगाकारश्च म इत्याह स्वगाकृत्या, अग्निश्च मे घर्मश्च म इत्याहैतद् वै ब्रह्मवर्चसस्य रूप७् रूपेणव ब्रह्मवर्चसमव रुन्ध, ऋक्च मे साम च म इत्याहै

## T.S. 5-4-8-5

तद्वै छन्दसा७ रूप७ं रूपेणैव छन्दा७स्यव रुन्धे, गर्भाश्च मे वथ्साश्च म इत्याहैतद् वै पशूना७ रूप७ं रूपेणैव पशूनव रुन्धे, कल्पाञ्जुहोत्य क्ळृप्तस्य क्लृप्त्यै युग्मद युजे जुहोति मिथुनत्वायो–त्तरावती भवतोऽभिक्रान्त्या, एका च मे तिस्रश्च म इत्याह देवछन्दसं ँवा एका च तिस्रश्च

## T.S. 5-4-8-6

मनुष्यछन्दसं चतस्रश्चाष्टौ च देवछन्दसं चैव मनुष्य छन्दसश्चाऽव रुन्ध, आ त्रयस्त्रि७ं शतो जुहोति त्रयस्त्रि७ं शद्वै देवता देवता एवाऽव रुन्ध, आऽष्टा चत्वारि७ं शतो जुहोत्यष्टा चत्वारि७ं शदक्षरा जगती जागताः पशवो जगत्यैवाऽस्मै पशूनव रुन्धे, वाजश्च प्रसवश्चेति द्वादशं जुहोति द्वादश मासा स्संवथ्सर स्संवथ्सर एव प्रति तिष्ठति ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

## 36.2 पूर्णाहुतिः

पूर्णाहुति-मुत्तमां जुहोति । सर्वं ँवै पूर्णाहुतिः । सर्वमेवाप्नोति ।
अथो इयं ँवै पूर्णाहुतिः । अस्यामेव प्रतितिष्ठति ।

सप्तते अग्ने समिध स्सप्तजिह्वा-स्सप्तर्षय-स्सप्तधाम प्रियाणि ।
सप्तहोत्रा स्सप्तधात्वा यजन्ति सप्तयोनी रापृणस्वा घृतेन स्वाहा ।
अग्नये सप्तवत इदं न मम ।

*Instructions (These are not Mantras)*

(आज्य स्थालीं दर्वीं च उत्तरतो निधाय ।

अप-उपस्पृश्य, प्राणान् आयम्य , अग्निं परिषिच्य)

# 37 घन मन्त्राः

## 37.1 मे जीवातुः

वाक्यं – मे जीवातुश्च मे, दीर्घायुत्वं च मे, ऽनमित्रं च मे, ऽभयं च मे, सुगं च मे, शयनं च मे, सूषा च मे, सुदिनं च मे ॥

1. मे जीवातु, र्जीवातु र्मे, मे जीवातु–श्च, च जीवातुर्मे,
   मे जीवातु–श्च ।
2. जीवातु–श्च, च जीवातु,–र्जीवातु–श्च मे, मे च जीवातु,
   र्जीवातु–श्च मे ।
3. च मे, मे च, च मे दीर्घायुत्वं, दीर्घायुत्वं मे च, च मे दीर्घायुत्वं ।
4. मे दीर्घायुत्वं, दीर्घायुत्वं मे, मे दीर्घायुत्वं च, च दीर्घायुत्वं मे,
   मे दीर्घायुत्वं च ।
5. दीर्घायुत्वं च, च दीर्घायुत्वं, दीर्घायुत्वं च मे, मे च दीर्घायुत्वं,
   दीर्घायुत्वं च मे ।

6. दीर्घायुत्वमिति दीर्घायु – त्वं ।

7. च मे, मे च, च मे ऽनमित्र, मनमित्रं मे च, च मे ऽनमित्रं ।

8. मे–ऽनमित्र, मनमित्रं मे, मे ऽनमित्रं च, चा नमित्रं मे, मे ऽनमित्रं च ।

9. अनमित्रं च, चा नमित्र,–मनमित्रं च मे, मे चा नमित्र,

–मनमित्रं च मे ।

10. च मे, मे च, च मेऽभय,–मभयं मे च, च मे ऽभयं ।

11. मे ऽभय,–मभयं मे, मे ऽभयं च, चा भयं मे, मे ऽभयं च ।

12. अभयं च, चा भय,–मभयं च मे, मे चा भय,–मभयं च मे ।

13. च मे, मे च, च मे सुगॅं, सुगं मे च, च मे सुगं ।

14. मे सुगॅं, सुगं मे, मे सुगं च, च सुगं मे, मे सुगं च ।

15. सुगं च, च सुगॅं, सुगं च मे, मे च सुगॅं, सुगं च मे ।

16. सुगमिति सु – गं ।

17. च मे, मे च, च मे शयनॅं, शयनं मे च, च मे शयनं ।

18. मे शयनॅं शयनं मे, मे शयनं च, च शयनं मे, मे शयनं च ।

19. शयनं च, च शयन॑ꣳ, शयनं च मे, मे च शयन॑ꣳ, शयनं च मे ।

20. च मे, मे च, च मे सूषा, सूषा मे च, च मे सूषा ।

21. मे सूषा, सूषा मे, मे सूषा च, च सूषा मे, मे सूषा च ।

22. सूषा च, च सूषा, सूषा च मे, मे च सूषा, सूषा च मे ।

23. सूषेति सु – उषा ।

24. च मे, मे च, च मे सुदिनꣳ, सुदिनं मे च, च मे सुदिनं ।

25. मे सुदिनꣳ, सुदिनं मे, मे सुदिनं च, च सुदिनं मे, मे सुदिनं च ।

26. सुदिनं च, च सुदिनꣳ, सुदिनं च मे, मे च सुदिनꣳ,
सुदिनं च मे ।

27. सुदिनमिति सु – दिनं ।

28. च मे, मे च, च मे ।

29. म इति मे ॥

## 37.2 मयि मेधां मयि प्रजां

वाख्यं – मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥

1. मयि मेधां, मेधां मयि, मयि मेधां मयि, मयि मेधां मयि,
मयि मेधां मयि ।

2. मेधां मयि, मयि मेधां, मेधां मयि प्रजां, प्रजां मयि मेधां,
मेधां मयि प्रजां ।

3. मयि प्रजां, प्रजां मयि, मयि प्रजां मयि, मयि प्रजां मयि,
मयि प्रजां मयि ।

4. प्रजां मयि, मयि प्रजां, प्रजां मयि सूर्य, स्सूर्यो मयि प्रजां,
प्रजां मयि सूर्यः ।

5. प्रजामीति प्र – जां ।

6. मयि सूर्य, स्सूर्यो मयि, मयि सूर्यो भ्राजो, भ्राज स्सूर्यो मयि,
मयि सूर्यो भ्राजः ।

7. सूर्यो भ्राजो, भ्राज स्सूर्य, स्सूर्यो भ्राजो दधातु, दधातु भ्राज स्सूर्य, स्सूर्यो भ्राजो दधातु ।

8. भ्राजो दधातु, दधातु भ्राजो, भ्राजो दधातु ।

9. दधात्वि–ति दधातु ॥

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति ।

प्राङ्गा होतु–र्धिष्ण्या दुथ्सर्पेत् ।

येयं प्रागाद् यशस्वती । सामा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति ।

तेजस्–व्येव यशस्वी ब्रह्मवर्चसी भवति ॥

---

## 37.3 मारुत मनर्वाणं

1. मारुत– मनर्वाण, मनर्वाणं मारुतं, मारुत–मनर्वाणꣳ रथेशुभꣳ, रथेशुभ मनर्वाणं मारुतं, मारुत मनर्वाणꣳ रथेशुभं ।

2. अनर्वाणꣳ रथेशुभꣳ, रथेशुभ–मनर्वाण,–मनर्वाणꣳ रथेशुभं ।

3. रथे शुभमिति रथे – शुभं ॥

अतोतो वा उत्तराणि श्रेयाꣳसि भवन्ति ॥

---

## 37.4 सा प्रजां

1. सा प्रजां, प्रजा॒ँ सा, सा प्रजां पशून्, पशून् प्रजा॒ँ सा,
   सा प्रजां पशून् ।
2. प्रजां पशून्, पशून् प्रजां, प्रजां पशून् यजमानाय,
   यजमानाय पशून् प्रजां, प्रजां पशून् यजमानाय ।
3. प्रजामिति प्र – जां ।
4. पशून् यजमानाय, यजमानाय पशून्, पशून् यजमानाय प्र,
   प्र यजमानाय पशून् पशून् यजमानाय प्र ।
5. यजमानाय प्र, प्र यजमानाय, यजमानाय प्र जनयति,
   जनयति प्र यजमानाय, यजमानाय प्र जनयति ।
6. प्र जनयति, जनयति प्र, प्र जनयति ।
7. जनयतीति जनयति ॥

एतेन वै देवा जैत्वानि जित्वा । यं काममकामयन्त तमाप्नुवन्न् ।
यं कामं कामयते । तमे तेनाप्नोति ॥

## 37.5 यस्य पुत्रः

1. यस्य पुत्रः, पुत्रो यस्य, यस्य पुत्रो जातो, जातः पुत्रो यस्य,
यस्य पुत्रो जातः ।

2. पुत्रो जातो, जातः पुत्रः, पुत्रो जात–स्स्या, थ्स्या–ज्जातः पुत्रः,
पुत्रो जात–स्स्यात् ।

3. जात–स्स्या,थ्स्या–ज्जातो, जात–स्यात् तेज, स्तेज–स्या ज्जातो,
जात–स्यात् तेजः ।

4. स्या तेजस्ते जस्या थ्स्यात्तेज एवै व तेजस्या थ्स्यात्तेज एव ।

5. तेज एवै व तेज, स्तेज एवास्मि, –न्नस्मिन्नेव तेज,
स्तेज एवास्मिन्न् ॥

6. एवास्मि–न्नस्मिने–, वै–वाऽस्मिन् ब्रह्मवर्चसं,
ब्रह्मवर्चस–मस्मिन्ने वै, वास्मिन् ब्रह्मवर्चसं ।

7. अस्मिन् ब्रह्मवर्चसं, ब्रह्मवर्चस–मस्मि–, न्नस्मिन् ब्रह्मवर्चसं दधाति,
दधाति ब्रह्मवर्चस – मस्मि, –न्नस्मिन् ब्रह्मवर्चसं दधाति ।

8. ब्रह्मवर्चसं दधाति, दधाति ब्रह्मवर्चसं, ब्रह्मवर्चसं दधाति ।

9. ब्रह्मवर्चसमिति ब्रह्म – वर्चसं ।

10. दधातीति दधाति ॥

तेजस्वी यशस्वी ब्रह्मवर्चसी स्यामिति । प्राङ्ग होतु र्धिष्ण्या दुत्सर्पेत् । येयं प्रागा–द्यशस्वति । सामा प्रोर्णोतु । तेजसा यशसा ब्रह्मवर्चसेनेति । तेजस् व्येव यशस्वी ब्रह्मवर्चसी भवति ॥

---

## 37.6 ये देवा दिवि भागा

वाख्यं – ये देवा दिवि भागा इति कृष्णा जिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा भवन्ति ।

1. ये देवा, देवा ये, ये देवा दिविभागा, दिविभागा देवा ये,
   ये देवा दिविभागाः ।

2. देवा दिविभागा, दिविभागा देवा, देवा दिविभागा इतीति दिविभागा देवा,
   देवा दिविभागा इति ।

3. दिविभागा इतीति दिविभागा, दिविभागा इति कृष्णाजिनं,
कृष्णाजिन–मिति दिविभागा, दिविभागा इति कृष्णाजिनं ।

4. दिविभागा इति दिवि – भागाः ।

5. इति कृष्णाजिनं, कृष्णाजिन – मितीति कृष्णाजिन–मवाव कृष्णाजिन–
मितीति कृष्णाजिन–मव ।

6. कृष्णाजिन–मवाव कृष्णाजिनं कृष्णाजिन–मव धूनोति धूनोत्यव
कृष्णाजिनं कृष्णाजिन–मव धूनोति ।

7. कृष्णा जिनमिति कृष्ण – अजिनं ।

8. अव धूनोति धूनो त्यवाव धूनोती म इमे धूनोत्यवाव धूनोतीमे ।

9. धूनोतीम इमे धूनोति धूनोतीम एवै वे मे धूनोति धूनोतीम एव ।

10. इम एवै वे म इम एवास्मा अस्मा एवेम इम एवास्मै ।

11. एवास्मा अस्मा एवै वास्मै लोका लोका अस्मा
एवै वास्मै लोकाः ।

12. अस्मै लोका , लोका अस्मा, अस्मै लोका प्रीताः ,

प्रीता लोका अस्मा,अस्मै लोकाः प्रीताः ।

13. लोकाः प्रीता, प्रीता लोका, लोका प्रीता अभीष्टा,

अभीष्टा प्रीता लोका,लोका प्रीता अभीष्टाः ।

14. प्रीता अभीष्टा अभीष्टाः प्रीताः प्रीता अभीष्टा भवन्ति

भवन्त्यभीष्टाः प्रीताः प्रीता अभीष्टा भवन्ति ।

15. अभीष्टा भवन्ति भवन्त्यभीष्टा अभीष्टा भवन्ति ।

16. अभीष्टा इत्यभि इष्टाः ।

17. भवन्तीति भवन्ति ॥

हृदयं यजू꣡ꣳषि पत्न्यश्च । यथावकाशं ग्रहान् ।

यथावकाशं प्रतिग्रहान् ँल्लोकं पृणाश्च ।

सर्वाहास्यै ता देवताः प्रीता अभीष्टा भवन्ति ॥

## 37.7 प्रजामायुर्धनं च

1. प्रजा–मायुरायुः प्रजां प्रजामायु र्धनं धनमायुः प्रजां प्रजामयु र्धनं ।

2. प्रजामिति प्र – जां ।

3. आयु र्धनं धन–मायु–रायु र्धनं च च धन–मायु–रायु र्धनं च ।

4. धनं च च धनं धनं च ।

5. चेति च ॥

पश्यति पुत्रं । पश्यति पौत्रं । प्र प्रजया पशुभि –र्मिथुनै –र्जायते ।
यस्यैवं ँविदुषो ऽग्निहोत्रं जुह्वति । य उचैन देवं ँवेद ॥

---

## 37.8 सर्वेभ्यो वै कामेभ्यः

वाख्यं – सर्वेभ्यो वै कामेभ्यः सन्धि र्दुहे तद् यजमाना स्सर्वान्
कामान वरुन्धते ॥

1. सर्वेभ्यो वै, वै सर्वेभ्यः , सर्वेभ्यो वै कामेभ्यः, कामेभ्यो वै सर्वेभ्यः,
   सर्वेभ्यो वै कामेभ्यः ।

2. वै कामेभ्यः, कामेभ्यो वै, वै कामेभ्य–स्सन्धि,
स्सन्धिः कामेभ्यो वै, वै कामेभ्य–स्सन्धिः ।

3. कामेभ्य स्सन्धि, स्सन्धिः कामेभ्यः, कामेभ्यः सन्धि र्दुहे,
दुहे सन्धिः कामेभ्यः, कामेभ्यः संन्धि र्दुहे ।

4. संधिर् दुहे, दुहे सन्धि, स्सन्धि र्दुहे तत्तत् दुहे सन्धि,
स्सन्धि र्दुहे तत् ।

5. सन्धिरिति सं – धिः ।

6. दुहे तत्तत् दुहे , दुहे तद् यजमाना, यजमानाः तत् दुहे,
दुहे तद् यजमानाः ।

7. तद् यजमाना, यजमानाः तद्, तद् यजमाना स्सर्वान्,
थ्सर्वान् यजमानाः तद्, तद् यजमाना स्सर्वान् ।

8. यजमानाः सर्वान्, थ्सर्वान् यजमाना, यजमानाः सर्वान् कामान् ,
कामान् थ्सर्वान् यजमाना, यजमानाः सर्वान् कामान् ।

9. सर्वान् कामान्, कामान् थ्सर्वान्, थ्सर्वान् कामान वाव कामान् थ्सर्वान् –थ्सर्वान् कामानव ।

10. कामान–वाव कामान्, कामान व–रुन्धते रुन्धतेऽव कामान् कामान–व–रुन्धते ।

11. अव–रुन्धते रुन्धतेऽ वावरुन्धते ।

12. रुन्धत इति रुन्धते ॥

सांग्रहण्येष्ट्या यजते । इमां जनता॒न् संगृह्ण नीति । द्वादशा रत्नी रशना भवति । द्वादश मासा स्संवथ्सरः । संवँथ्सर मेवा वरुन्धे । मौंजी भवति । ऊर्ग्वै मुञ्चाः । ऊर्ज मेवा वरुन्धे । चित्रा नक्षत्रं भवति । चित्रं ँवा एतत् कर्म । यदश्वमेध–स्समृद्ध्यै ॥

---

## 37.9 पुष्टिं धत्तः

1. पुष्टिं धत्तो, धत्तः पुष्टिं, पुष्टिं धत्तः पुष्यति, पुष्यति धत्तः पुष्टिं, पुष्टिं धत्तः पुष्यति ।

2. धत्तः पुष्यति, पुष्यति धत्तो, धत्तः पुष्यति प्रजया, प्रजया पुष्यति धत्तो,
धत्तः पुष्यति प्रजया ।

3. पुष्यति प्रजया, प्रजया पुष्यति, पुष्यति प्रजया पशुभिः,
पशुभिः प्रजया पुष्यति, पुष्यति प्रजया पशुभिः ।

4. प्रजया पशुभिः, पशुभिः प्रजया, प्रजया पशुभिः ।

5. प्रजायेति प्र _ जया ।

6. पशुभिरिति पशु – भिः ॥

पुष्ट्–यै वा एतद् रूपं । यदजा । त्रिसंवँथ्सर–स्यान्यान्
पशून् परि प्रजायते । बस्ताजिन मद्ध्यव रोहति ।
पुष्ट्यामेव प्रजनने प्रतितिष्ठति ॥

---

## 37.10 ता विष्णो पाहि

वाख्यं– ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिं पाहि मां ँयज्ञनियं ॥

1. ता विष्णो, विष्णो तास्ता विष्णो पाहि पाहि विष्णो
तास्ता विष्णो पाहि ।

2. विष्णो पाहि, पाहि विष्णो, विष्णो पाहि पाहि, पाहि पाहि विष्णो, विष्णो पाहि पाहि ।

3. विष्णो इति – विष्णो ।

4. पाहि पाहि, पाहि पाहि, पाहि पाहि यज्ञं, यज्ञं पाहि पाहि, पाहि पाहि यज्ञं ।

5. पाहि यज्ञं, यज्ञं पाहि, पाहि यज्ञं पाहि, पाहि यज्ञं पाहि, पाहि यज्ञं पाहि ।

6. यज्ञं पाहि, पाहि यज्ञं, यज्ञं पाहि यज्ञपतिं, यज्ञपतिं पाहि यज्ञं, यज्ञं पाहि यज्ञपतिं ।

7. पाहि यज्ञपतिं, यज्ञपतिं पाहि, पाहि यज्ञपतिं पाहि, पाहि यज्ञपतिं पाहि, पाहि यज्ञपतिं पाहि ।

8. यज्ञपतिं पाहि, पाहि यज्ञपतिं, यज्ञपतिं पाहि मां, मां पाहि यज्ञपतिं, यज्ञपतिं पाहि मां ।

9. यज्ञपति मिति यज्ञ – पतिं ।

10. पाहि मां, मां पाहि, पाहि मां ँयज्ञनियं, ँयज्ञनियं मां पाहि,
पाहि मां ँयज्ञनियं ।

11. मां ँयज्ञनियं, ँयज्ञनियं मां, मां यँज्ञनियं ।

12. यज्ञनियमिति यज्ञ – नियं ॥

ता विष्णो पाहीत्याह । यज्ञोवै विष्णुः । यज्ञस्यतृतौ । पाहि यज्ञं पाहि यज्ञपतिं पाहिमां ँयज्ञनियमित्याह । यज्ञाय यजमानायात्मने । तेभ्य एवाशिष मा शास्तेनात्यै ॥

## 37.11 आशिषमेवै तामा शास्ते

*वाख्यं – आशिष मे वै तामा शास्ते ॥*

1. आशिषमे वै वाशिष माशिषमे वैता मेता मेवाशिष माशिष मे वैतां ।

2. आशिषमित्या – शिषं ।

3. ए वै ता मेता मे वै वै ता मै ता मे वै वै ता मा ।

4. एता मैता मेता मा शास्ते शास्त मैता मेता मा शास्ते ।

5. आशास्ते शास्त आशास्ते । 6. शास्त इति शास्ते ॥

## 37.12 एवास्मिन्नायु र्ददतिः

*वाख्यं – एवास्मिन्नायु र्ददति सर्वमायुरेति ॥*

1. त एवै व ते त एवास्मिन्न–स्मिन्नो व ते त एवास्मिन् ।
2. एवास्मिन्न–स्मिन्नो वै वास्मिन्नायुरायु–रस्मिन्नो वै वास्मिन्नायुः ।
3. अस्मिन्नायुरायु–रस्मिन्न–स्मिन्नायु र्ददति दाददत्यायु–रस्मिन्नऽ–
मिन्नायु र्ददति ।
4. आयु र्ददति तददत्या–युरायु र्ददति सर्वꣳ सर्वं तददत्या–युरायु
र्ददति सर्वं ।
5. ददति सर्वꣳ, सर्वं ददति, ददति सर्वमायु, –रायुस्सर्वं ददति,
ददति सर्वमायु ।
6. सर्व मायु, –रायु स्सर्वꣳ, सर्वमायुरेत्ये त्यायु–स्सर्वꣳ,
सर्वमायुरेति ।
7. आयुरेत्ये–त्यायु–रायुरेति ।
8. एतीत्येति ॥

## 37.13 शतमानं भवति

वाख्यं – शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति ॥

1. शतमानं भवति, भवति शतमान७्, शतमानं भवति शतायु, श्शतायु र्भवति शतमान७्, शतमानं भवति शतायुः ।
2. शतमानमिति शत – मानं ।
3. भवति शतायु, श्शतायु र्भवति, भवति शतायुः पुरुषः, पुरुष श्शतायु र्भवति, भवति शतायुः परुषः ।
4. शतायुः पुरुषः, पुरुष श्शतायु, श्शतायुः पुरुष श्शतेन्द्रिय, श्शतेन्द्रियः पुरुष श्शतायु, श्शतायुः पुरुष श्शतेन्द्रियः ।
5. शतायुरिति शत – आयुः ।
6. पुरुष श्शतेन्द्रिय, श्शतेन्द्रियः पुरुषः, पुरुष श्शतेन्द्रिय आयुष्या–युषि शतेन्द्रियः पुरुषः, पुरुष श्शतेन्द्रिय आयुषि ।

7. शतेन्द्रिय आयुष्यायुषि शतेन्द्रिय, श्शतेन्द्रिय आयुष्ये वैवायुषि
शतेन्द्रिय–श्शतेन्द्रिय आयुष्येव ।

8. शतेन्द्रिय इति शत – इन्द्रियः ।

9. आयुष्ये वै वायुष्यायु–ष्येवेन्द्रिय इन्द्रिय एवायुष्यायु–ष्येवेन्द्रिये ।

10. एवेन्द्रिय इन्द्रिय एवैवेन्द्रिये प्रति प्रतीन्द्रिय एवैवेन्द्रिये प्रति ।

11. इन्द्रिये प्रति प्रतीन्द्रिय इन्द्रिये प्रतितिष्ठति तिष्ठति प्रतीन्द्रिय
इन्द्रिये प्रतितिष्ठति ।

12. प्रति तिष्ठति तिष्ठति प्रति प्रतितिष्ठति ।

13. तिष्ठतीति तिष्ठति ॥

---

## 37.14 वै प्रजा

*वाख्यं – वै प्रजाः प्रजास्वेवाऽऽयु र्दधाति ॥*

1. वै प्रजाः प्रजा वै वै प्रजाः प्रजासु प्रजासु प्रजा वै
वै प्रजाः प्रजासु ।

2. प्रजाः प्रजासु प्रजासु प्रजाः प्रजाः प्रजास्वेवै व प्रजासु प्रजाः प्रजाः प्रजास्वेव ।

3. प्रजा इति प्र – जाः ।

4. प्रजास्वेवै व प्रजासु प्रजास्वे–वायुरायुरेव प्रजासु प्रजास्वेवाऽऽयुः ।

5. प्रजास्विति प्र – जासु ।

6. एवायुरायरेवै वायु र्दधाति दधात्यायुरेवै वायु र्दधाति ।

7. आयु र्दधाति दधात्यायुरायु र्दधाति ।

8. दधातीति दधाति ॥

# 38 आशीर्वाद मन्त्राः

These Asheervada Mantras are not continuous Mantras, (and not appearing one after the other), in Veda Texts but are consolidated from various places. For convenience purpose, these Mantras are given in a serial order as they are normally chanted. The Order of chanting may vary and the student needs to follow that order as is chanted in that function.

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोय मऽग्निः ।
तमेव भान्त मनु भाति सर्वं तस्य भासा सर्वमिदं विभाति || 1

पर्याप्त्या अनन्तरायाय सर्वस्थो–मोति रात्र उत्तम महद्भवति सर्वस्याप्त्यै
सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति || 2

ऋध्यास्म हव्यै– र्नमसोप सद्य । मित्रं देवं मित्रधेयन्नो अस्तु ।
अनुराधान् हविषा वर्धयन्तः । शतन्जीवेम शरद–स्सवीराः || 3

नवोनवो भवति जायमानो ऽह्नाङ्केतु–रुषसा मेत्यग्रे ।
भागं देवेभ्यो विदधा–त्यायन् प्र चन्द्रमा–स्थिरति दीर्घमायुः || 4

शतमानं भवति शतायुः पुरुषश्शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति || 5

सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत ।
सौभाग्य मस्यै दत्वा याथास्तं विपरेतन || 6

इमाम् त्वमिन्द्र मीड्व स्सुपुत्राꣳ सुभगां कुरु ।
दशास्यां पुत्राना धेहि पतिमेका दशं कृधि || 7

यशस्करं बलावन्तं प्रभुत्वं तमेव राजाधि पति–र्बभूव ।
सङ्कीर्ण नागाश्वपति र्नराणां सुमङ्गल्यं सततं दीर्घमायुः || 8

संज्ञानं ँविज्ञानं प्रज्ञानं जानदभि जानत् ।
सङ्कपल्मानं प्रकल्पमान–मुपकल्पमान–मुपक्लृप्तं क्लृप्तं ।
श्रेयो वसीय आय स्संभूतं भूतं । चित्रः केतुः प्रभानाभान्–थ्संभान् ।
ज्योतिष्माꣳ स्तेजस्वाना तपꣳ स्तपन्न भितपन्न् ।
रोचनो रोचमान–श्शोभन–श्शोभमानः कल्याणः || 9

आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य इषव्य–श्शूरो महारथो जायतां दोग्ध्री धेनु– र्वोडाऽनड्वा नाशु– स्सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा स्सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे– निकामेनः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पतां || 10

बहुग्वै बह्वश्वायै बह्वजाविकायै । बहुव्रीहियवायै बहुमाषतिलायै । बहुहिरण्यायै बहुहस्तिकायै । बहुदासपूरुषायै रयिमत्यै पुष्टिमत्यै । बहुरायस्पोषायै राजास्तु || 11

आयुष्टे विश्वतो दध दय मग्निर्वरेण्यः । पुनस्ते प्राण आयति परायक्ष्मꣳ सुवामिते । आयुर्दा अग्ने हविषो जुषाणो घृत प्रतीको घृतयो निरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि–रक्षतादिमं || 12

पुरस्ता द्दश हौतार–मुदञ्च –मुपदधाति यावत्पदं ।
हृदयं यजुषी पत्न्यौ च । दक्षिणतः प्राञ्च–ञ्चतु र्होतारं ।
पश्चा–दुदञ्चं पञ्च होतारं । उत्तरतः प्राञ्च षड्ढोतारं ।
उपरिष्टात्  प्राञ्च सप्त होतारं । हृदयं यजू षि पत्न्यैश्च ।
यथावकाशं ग्रहान् । यथावकाशं प्रति ग्रहान् लोकं पृणाश्च ।
सर्वाहा स्यैता देवताः प्रीता अभीष्टा भवन्ति || 13

---

## 38.1 आरण्यके द्वितीयप्रश्नः प्रथमपञ्चातिः

सहवै देवानां चासुराणां च यज्ञौ प्रतता–वास्तां वय स्वर्गं लोकमेष्यामो वयमेष्याम इति तेऽसुरा–स्सन्नह्य सह सैवाचरन् ब्रह्मचर्येण तपसै व देवास्तो ऽसुरा अमुह्य स्तेन प्राजान स्ते पराभवन् तेन स्वर्गं लोक–मायन् प्रसृतेन  वै यज्ञेन देवा स्वर्गं  लोक–मायन्न प्रसृतेना सुरान् पराऽभावयन् प्रसृतो हवै यज्ञो–पवीतिनो यज्ञो ऽप्रसृतो ऽनुपवीतिनो यत् किञ्च ब्राह्मणो यज्ञोपवी –त्यधीते यजत एव तत्तस्मा–ध्यज्ञोपवीत्ये

वाधीयीत याजयेद्यजेतवा यज्ञस्य प्रसृत्या अजिनं वासो वा दक्षिणत
उपवीय दक्षिणं बाहुमुध्दरते ऽवधत्ते सव्यमिति यज्ञोपवीत मेत देव
विपरीतं प्राचीनावीतꣳ सँवीतं मानुषं ॥

---

## 38.2 आरण्यके द्वितीयप्रश्नः द्वितीयपञ्चातिः

रक्षाꣳसि हवा पुरोऽनुवाके तपोग्रमतिष्ठन्त तान् प्रजापतिर्वरेणोपा मन्त्रयत
तानि वरमवृणीतादित्यो नो योद्धा इति तान् प्रजापतिर ब्रवीद्यो धयध्व–
मिति तस्मा दुत्तिष्ठन्तꣳ हवा तानि रक्षाꣳस्यादित्यं योधयन्ति यावदस्त
मन्वगात्तानि हवा एतानि रक्षाꣳसि गायत्रिया ऽभिमन्त्रि तेनां भसा
शाँम्यन्ति तदुहवा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्रिया
ऽभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्री भूत्वा तानि
रक्षाꣳसि मन्दे हाऽरुणे द्वीपे प्रक्षिपन्ति यत् प्रदक्षिणं प्रक्रमन्ति तेन
पाप्मानमव धून्वन् त्युद्यन्तमस्तं यन्त मादित्य मभि ध्यायन् कुर्वन्
ब्राह्मणो विद्वान्थ्सकलं भद्रमश्नुते ऽसावादित्यो ब्रह्मेति
ब्रह्मैवसन् ब्रह्माप्येति य एवं वेद ॥

---

## 38.3 नारायणोपनिषत्

This is a separate upanishad and is different from "Maha Narayanopanishad". Atharva Rishi who has seen Lord Narayana has conveyed his direct experience in poetic form through "Narayana Upanishad". It is also called "Narayana Atharva Sheersham" by Scholars.

ओं । सह ना ववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।

तेजस्वि नावधीतमस्तु मा विद्विषावहैः ।

ओं शान्तिः शान्तिः शान्तिः ॥

ओं अथ पुरुषो ह वै नारायणोऽ कामयत प्रजाः सृजेयेति ।

नारायणात् प्राणो जायते । मनः सर्वेन्द्रियाणि च ।

खं वायु–र्ज्योति–रापः पृथिवी विश्वस्य धारिणी ।

नारायणात् ब्रह्मा जायते । नारायणात् रुद्रो जायते ।

नारायणा–दिन्द्रो जायते । नारायणात् प्रजापतयः प्रजायन्ते ।

नारायणात् द्वादशा–दित्या रुद्रा वसव–स्सर्वाणि च छन्दा॑ꣳसि ।

नारायणादेव समुत्–पद्यन्ते । नारायणे प्रवर्त्तन्ते । नारायणे प्रलीयन्ते ।

ओं । अथ नित्यो नारायणः । ब्रह्मा नारायणः ।

शिवश्च नारायणः । शक्रश्च नारायणः । द्यावा–पृथिव्यौ च नारायणः ।

कालश्च नारायणः । दिशश्च नारायणः । ऊर्ध्वश्च नारायणः ।

अधश्च नारायणः । अन्तर्बहिश्च नारायणः ।

नारायण एवेदꣳ सर्वं ॥ यत् भूतं यच्च भव्यं ।

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः ।

न द्वितियोऽस्ति कश्चित् । य एवं वेद ।

स विष्णुरेव भवति स विष्णुरेव भवति ।

ओमित्यग्रे व्याहरेत् । नम इति पश्चात् ।

नारायणाये–त्युपरिष्ठात् । ओमित्येकाक्षरं ।

नम इति द्वे अक्षरे । नारायणायेति पञ्चाक्षराणि ।

एतद्वै नारयणस्या-ष्ठाक्षरं पदं ।

यो ह वै नारयणस्या-ष्ठाक्षरं पद-मद्ध्येति ।

अनपब्रुव-स्सर्व-मायुरेति । विन्दते प्राजापत्यꣳ रायस्पोषं गौपत्यं ।

ततोऽमृतत्व-मश्नुते ततोऽमृतत्व-मश्नुत इति । य एवं वेद ।

प्रत्यगानन्दं ब्रह्मपुरुषं प्रणव स्वरूपं । अकार उकार मकार इति ।

तानेकधा समभरत्त-देतदोमिति ।

युमुक्त्वा मुच्यते योगी जन्म संसार-बन्धनात् ।

ओं नमो नारायणायेति मन्त्रोपासकः ।

वैकुण्ठ भुवन-लोकं गमिष्यति ।

तदिदं परं पुण्डरीकं विज्ञान-घनं । तस्मात् तदिदावन् मात्रं ।

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनों । सर्व भूतस्थमेकं नारायणं ।

कारणरूपमकार परब्रह्मों । एतदथर्व शिरोयोऽधीते ।

प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

सायमधीयानो दिवसकृतं पापं नाशयति ।

माद्ध्यन्दिन–मादित्यभि–मुखोऽधीयानः ।
पञ्च–पातको–पपातकात् प्रमुच्यते ।

सर्व वेद पारायण पुण्यं लभते । नारायण सायुज्य–मवाप्नोति नारायण सायुज्य–मवाप्नोति । य एवं वेद । इत्युपनिषत् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

---

# 39 प्रकीर्णाध्यायः

## 39.1 ब्राह्मण एक होता ।

ब्राह्मण एक होता । सयज्ञः । समेददातु प्रजां पशून् पुष्टिम् यशः ।
यज्ञश्च मे भूयात् । **1**

अग्निर्द्वि होता । सभर्ता । समेददातु प्रजां पशून् पुष्टिं यशः ।
भर्ताश्च मे भूयात् । **2**

पृथिवी त्रि होता । सप्रतिष्ठा । समेददातु प्रजां पशून् पुष्टिं यशः ।
प्रतिष्ठा च मे भूयात् । **3**

अन्तरिक्षं चतु र्होता । सविष्ठाः । समेददातु प्रजां पशून् पुष्टिं ँयशः ।
विष्ठाश्च मे भूयात् । **4**

वायुः पञ्च होता । सप्राणः । समेददातु प्रजां पशून् पुष्टिं ँयशः ।
प्राणश्च मे भूयात् । **5**

चन्द्रमाः षड्ढोता । स ऋतून् कल्पयाति ।
समेददातु प्रजां पशून् पुष्टिं ँयशः । ऋतवश्च मे कल्पन्तां । **6**

अन्न७ सप्तहोता । सप्राणस्य प्राणः ।
समेददातु प्रजां पशून् पुष्टिं ँयशः । प्राणस्य च मे प्राणो भूयात् । **7**

द्यौरष्ट होता । सोऽना–धृष्यः । समेददातु प्रजां पशून् पुष्टिं ँयशः ।
अना धृष्यश्च भूयासं । **8**

आदित्यो नव होता । स तेजस्वी । समेददातु प्रजां पशून् पुष्टिं ँयशः।
तेजस्वी च भूयासं । **9**

प्रजापति र्दश होता । स इद७ सर्वं ।
समेददातु प्रजां पशून् पुष्टिं ँयशः । सर्वञ्च मे भूयात् । **10**

The Following Mantra is not a part of ब्राह्मण एक होता However during Rudra-Ekadasinis etc the following Mantra is chanted as 11th “upachaara Mantram” after the above 10 Mantras.

हिरण्यपात्रं मधोः पूर्णं ददाति । मदव्यो सानीति ।

एकदा ब्रह्मण उपहरति । एकदैव यजमान आयुस्तेजो ददाति || 11

---

## 39.2 नमः प्राच्यै

नमः प्राच्यै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो,

नमो दक्षिणायै दिशेयाश्च देवता एतस्यां–प्रतिवसन्त्ये ताभ्यश्च नमो ,

नमः प्रतीच्यै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो

नम उदीच्यै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो

नम ऊर्ध्वायै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो

नमो ऽधरायै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो

नमो ऽवान्तरायै दिशेयाश्च देवता एतस्यां प्रतिवसन्त्ये ताभ्यश्च नमो ,

नमो गंगा यमुनयो र्मध्ये ये वसन्ति ,

ते मे प्रसन्नात्मा–नश्चिरं जीवितं वर्धयन्ति ,

नमो गंगा यमुनयो र्मुनिभ्यश्च नमो , नमो गंगा यमुनयो र्मुनिभ्यश्च नमः ॥

---

# 40 ऐकमत्य सूक्तं

## (To be chanted as per Rig Vedic Sruti )

ओं । संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य्य आ ।

इळस्पदे समिद्ध्यसे स नो वसून्या भर ॥ 1

सं गच्छद्ध्वं सं वदद्ध्वं सं वो मनांसि जानतां ।

देवा भागं य्यथा पूर्वे संजानाना उपासते ॥ 2

समानो मन्त्र–स्समिति–स्समानी समानं मनस्सह चित्तमेषां ।

समानं मन्त्रमभि मन्त्रये वस्समानेन वो हविषा जुहोमि ॥ 3

समानी व आकूति–स्समाना हृदयानि वः ।

समानमस्तु वो मनो यथा व–स्सुसहासति ॥ 4

-----ऐकमत्यसूक्तं समाप्तं-----

ओं ॥ शान्तिः शान्तिः शान्तिः ॥

---